“ यात्रिकः ”

“ मदम्बाप्रतिकृति ”श्चेति

काव्यद्वयम्

कलले श्रीवेङ्कटरङ्गाचार्येण विदुषां

प्रणीतम्

विजयते.

GOLDSMITH'S

“THE TRAVELLER”

AND

COWPER'S

“MY MOTHER'S PICTURE”

Translated into Sanskrit Verse.

BY

Vidvan K. VENKATARANGACHARYA,

Sanskrit Pandit, Government High School.

SHIMOGA.

First Edition.

MYSORE:

PRINTED AT THE G. T. A. PRESS.

1907.

TO

HIS HIGHNESS

Sri Krishna Rajendra Odeyar Bahadur, G.C.S.I.

MAHARAJA OF MYSORE,

PATRON

OF SANSKRIT AS WELL AS EVERY OTHER LEARNING

THIS WORK

IS, WITH KIND PERMISSION, MOST RESPECTFULLY,

DEDICATED

BY

HIS HIGHNESS' MOST HUMBLE AND DEVOTED SUBJECT

THE AUTHOR.

॥ श्रीरस्तु ॥

स्वस्ति ! श्रीमहिशूरसुन्दरमहाराज्यश्रियाऽऽलिङ्गितः ।
श्रीमान्यादववंशभूर्विजयते श्रीकृष्णराजाधिराट् ॥
रक्षां यस्य महीयसीमधिगता तत्पूर्वजानामिव ।
श्रीमद्भारतभारतीह भजते श्रीभोजराज्यश्रियम् ॥ १ ॥

यं रक्षानिपुणं विलोक्य मुदितो 'यड्वर्ड्नृपस्सप्तमः' ।
श्रीमान् भारतराजराट् समतनोज्जीसीयसैभूषितम् ॥
तस्मै तत्समनुज्ञया कृतियुगी भक्त्याऽर्पितेयं मया ।
जीयात्तन्महिमप्रकाशनकरी यावन्मही राजते ॥ २ ॥

PREFACE.

It is with the intention of acquainting the Sanskrit ?andits of India with the serene, dignified and na-:urally artistic thoughts of Western poets, as contrast-:d with the lofty embellished and methodically natural ;entiments of our Aryan, or rather Oriental Poets, that . have made this humble attempt at a free translation nto Sanskrit Verse of Oliver Goldsmith's "The Γraveller" and of Cowper's "My Mother's Picture."

I have faithfully followed the originals as closely ıs possible and added a few Oriental touches here and here only to make the stern Western thoughts re-ishing to eastern minds. Care has been taken to ɔreserve as far as possible, in the translation, the sim-ɔlicity in diction and the dignity in thought of the ɔriginals.

I am, however, conscious of many imperfections vith which my works must necessarily abound, and I hall be thankful to my indulgent readers for their kind uggestions towards any emendations and corrections.

My sincere thanks are due to the several gentle-nen of Mysore, Bangalore and Shimoga, for the ecuniary help they have rendered me towards an early ublication of these works. I am compelled to omit to ɩention their names here only for want of space.

My thanks are also due to the Graduate's Trad-g Association Press, for the prompt and neat get up the book.

K. VENKATARANGACHARYA.

॥ श्रीः ॥

श्रीहयवदनलक्ष्मीनारायणाभ्यां नमः

श्रीमतोः यड्वर्ड्चक्रवर्तिश्रीकृष्णराजेन्द्रयोः

अभ्युदयाशंसनम्

श्रीमान् महान् भारतचक्रवर्ती सम्यक्प्रजारक्षणकर्मवर्ती ।
धर्म्यस्य मार्गस्य सदाऽनुवर्ती राजाऽऽङ्ग्लभूमेस्सदयप्रवर्ती । ॥ १ ॥
दयाप्रजारागमयीव मूर्तिः औदार्यसौन्दर्यविशालकीर्तिः ।
समूलमुत्खातनिजप्रजार्तिः अनन्यसाधारणभाग्यपूर्तिः । ॥ २ ॥
विराजमानो भुवि राजराजः श्रिया समानीकृतराजराजः ।
स्वयं द्वितीयः किमु देवराजः दयैकपात्रीकृतकृष्णराजः । ॥ ३ ॥
यदीयसाम्राज्यतले वसन्तः सौराज्यसौख्येन सदा लसन्तः ।
स्वयन्तु देवन्ति यमिन्द्रयन्ति क्षमामपि द्यौरिति भावयन्ति । ॥ ४ ॥
प्रासूत यं सा महिता दयार्द्रा विक्टोरियाऽऽम्बा विपुलप्रभावा ।
या भारतस्य प्रथमाऽधिराज्ञी क्षमेव या मूर्तिमती विरेजे । ॥ ५ ॥
याऽनन्यसाधारणदीर्घकालमशाद्विशालां स्ववशां धरित्रीम् ।
यस्याः प्रभुत्वे विविधाः प्रवृत्ताः प्रजामनोरञ्जनरूपमार्गाः । ॥ ६ ॥
“ विद्याचिकित्सालयन्त्रयुदन्तपत्रार्थनायक्रमलोहमार्गाः ।
प्रजाधनासुस्वमतानुसारप्रवृत्तिरक्षा समदृष्टिरक्षा । ॥ ७ ॥
स्त्रीणां बलात्संस्थितनाथचित्यां सहाधिरोपक्रमसन्निरोधः ।
विभिन्नयन्त्रानयनक्रिया च विदेशतो देशविवृद्धिहेतोः” । ॥ ८ ॥
यस्याश्च राज्यात्प्रभृति प्रजानां सर्वोत्तमं भारतराज्यमेतत् ।
श्रीरामराज्यस्थसुखं चिराय नष्टं पुनः प्राप्य नियच्छतीव । ॥ ९ ॥

यस्यात्मजो 'जार्ज् फ्रेडरिक् सुनामा वेल्स्राजपुत्रेत्युपगीयमानः ।
प्रकाशते सर्वगुणाभिरामः पितेव सर्वैरभिनन्द्यमानः । ॥१०॥
'यड्वर्ड्नृपस्सप्तम' इत्यभिख्या जेगीयते यस्य जगत्प्रमुख्या ।
अनेकराजेन्द्रकृतात्मसख्यः जेजीयतेऽसौ नरनाथमुख्यः । ॥११॥
दयाऽस्ति तस्यास्य विशालरूपा श्रीकृष्णभूपे विलसत्स्वरूपे ।
कर्णाटदेशक्षितिपालवर्ये महाशये प्रेमरसार्द्रचर्ये । ॥१२॥
कर्णाटसाम्राज्यधुरंधरोऽन्यकर्णाटकल्याणगुणैस्सुमान्यः ।
कर्णावतारःकिमु दानलोलः कर्णानुजन्मा किमु धर्मशीलः । ॥१३॥
यस्य प्रसूस्सा महती वदान्या वाणीविलासाङ्कितवीरमाता ।
या स्वप्रभुत्वे तनयस्य बाल्ये प्रजाः प्रजास्स्वाइव चिन्तयन्ती । ॥१४॥
अपादपारात्मकृपा स्वदेशं विक्टोरियाशासननिर्विशेषम् ।
अद्यापि यामत्र विराजमानां प्रजास्स्वधात्रीति विभावयन्ति । ॥१५॥
यस्यानुजातो युवराजवेद्यः नृसिंहकण्ठीरवभव्यनामा ।
निजाग्रजं राजति सेवमानो यथा स सौमित्रिरुपास्त रामम् । ॥१६॥
'जी. सी. यस्. ऐ' सद्बिरुदेन योऽद्य सुमण्डितः पण्डितपक्षपाती ।
श्रीमान् महान् भारतराजमानतारालिहाराश्रितनायकश्रीः । ॥१७॥
विराजमानो मणिराजराजत्सिंहासनारोहणभाग्यभूम्ना ।
प्रशास्ति कर्णाटधरां विशालां स्वयं परादर्शितधीमहिम्ना । ॥१८॥
स कृष्णराजोऽप्यतुलां विधत्ते स्वराजभक्तिप्रचुरां सुमैत्रीम् ।
यड्वर्ड्नृपे भूतलरत्नदीपे दयासमावर्जितसर्वभूपे । ॥१९॥
दयारसप्रेमरसाभिरम्यं ययोस्सुमैत्रयं जनतासुरम्यं ।
यथा पयश्शर्करिकाऽभिजन्यं माधुर्यमास्वाद्यमतीव मान्यम् । ॥२०॥
उभाविमौ भूपतिसार्वभूमौ स्वभावरम्यौ महितप्रभावौ ।
स्वराज्यतन्त्रप्रतिभाऽसमानौ मिथस्सुमैत्रीपरिभासमानौ । ॥२१॥
विभावरीनाथविभावसुभ्यां समप्रकाशौ गुणपूरिताशौ ।
दिनेदिने भूतिसमेधमानौ चिरं प्रशिष्टां निजराज्यभागौ । ॥२२॥

अभ्यर्थना.

कर्णाटगे वेणुपुराग्रहारे गृहीतजन्मा सुकुलाग्रजन्मा ।
जनाश्च यं वेङ्कटरङ्गशर्मनाम्नाऽऽर्यदत्तेन समाह्वयन्ति । ॥ १ ॥
श्रीरुक्मिणीनाम सुवत्सलाऽऽम्बा ज्येष्ठात्मजं यं सुषुवे सुसाध्वी ।
रङ्गार्यसच्छ्रोत्रियवर्यपौत्रः स यत्पिता श्रीनिधिराघवार्यः। ॥ २ ॥
'अण्णाजयंगार्य' विहूतनामा श्रीवैष्णवाचारसमात्तभूमा ।
विराजते यो हरियोगयुक्तस्सदा समाराधितविष्णुभक्तः । ॥ ३ ॥
श्रीमन्महीशूरविराजमाने श्रीमन्महाराजसुपोष्यमाणे ।
श्रीभारतीसौधगृहे चिराद्यस्समात्तसम्भावितहृद्यविद्यः । ॥ ४ ॥
वाधूलगोत्रस्स हि याजुषोऽहं तनोमि गीर्वाणगिरा प्रबन्धौ ।
'गोल्ड्स्मित्' कवे 'यात्रिक" नामगेयं 'कौपर्'कवे र्विश्रुत'मातृचित्रम्'। ॥ ५ ॥
अयं मदीयः प्रथमः प्रयत्नः परैरनादर्शितमार्ग एषः ।
तदत्र दोषा यदिसम्भवेयुर्बुधा मुदा तान्मम दर्शयेयुः। ॥ ६ ॥
द्वितीयमुद्राऽवसरे य एते सम्यक्परिष्कृत्य सुमुद्रितास्स्युः ।
प्रत्येमि चाहं गुणरक्तचित्तास्सन्तश्श्रमं मे सफलं च कुर्युः। ॥ ७ ॥

क्वाहं मन्दमतिः क्व तौ कविवरौ क्वेमे च काव्ये तयोः ।
कुर्वेऽहं परिवर्तनं तदपि तद्भावार्थसन्दर्शनम् ।
अस्मत्काव्यमतानि साधु कलयन्गीर्वाणभाषात्मकैः ।
श्लोकैरद्य यथामति श्रुतगुणास्तुष्यन्ति वै सज्जनाः॥ ॥ ८ ॥

यात्रिकः

THE TRAVELLER.

THE TRAVELLER

OF

GOLDSMITH.

Remote, unfriended, melancholy, slow,
Or by the lazy Scheld, or wandering Po;
Or onward, where the rude Carinthian boor
Against the houseless stranger shuts the door;
Or where Campania's plain forsaken lies,
A weary waste expanding to the skies;
Where'er I roam whatever realms to see,
My heart untravell'd fondly turns to thee;
Still to my brother turns with ceaseless pain,
And drags at each remove a lengthening chain.

Eternal blessings crown my earliest friend,
And round his dwelling guardian saints attend!
Blest be that spot, where cheerful guests retire
To pause from toil, and trim their evening fire:
Blest that abode, where want and pain repair,
And every stranger finds a ready chair:

|| श्रीः ||

श्रीमते हयवदनपरब्रह्मणे नमः

ज्ञानानन्दमयायास्तु विश्वरक्षाविहारिणे ।
नमः कल्याणरूपाय कमलाकान्तवक्षसे ॥

अथ 'गोल्ड्स्मित्' कवेः यात्रिकः

विदूरदेशेषु विनोदनार्थं 'षेल्ट्' नामनद्याः सविधेऽलसायाः ।
'पो'नामवल्याः कुटिलापगायाः तटेषु वा तत्परतश्च यत्र ॥ १ ॥
'क्यारिन्थिया' रूक्षजना वसन्ति दाक्षिण्यहीना गृहमागतेषु ।
तत्रापि वा 'कयम्पनिया'प्रदेशे जनास्तु यस्मिन् विरलं वसन्ति ॥ २ ॥
उद्वेजिका यत्र खिलस्थली च विभाति लीनेव दिगन्तभागे ।
भ्रातर्मयि भ्राम्यति तत्र तत्र पुरीषु वाऽरण्यतलेषु वाऽपि ॥ ३ ॥
मित्राद्यभावात् भवताप्ययोगात् शनैश्शनैरेव परं विषण्णे ।
ममान्तरात्मा त्वयि बद्धरागः विहाय मां त्वामभिधावतीव ॥ ४ ॥
अद्याप्ययं त्वद्विरहासहिष्णुः अपारदुःखेन विधावति त्वाम् ।
यथा यथाऽहं पुरतश्चलामि तथा तथा प्रेमगुणश्च दिग्धे ॥ ५ ॥

सम्पद्यतां शाश्वतभोगयोगो भूयो मम भ्रातरि बाल्यमित्रे ।
रक्षन्तु कामं गृहदेवताश्च गृहान् तदीयान् सततं प्रसन्नाः ॥ ६ ॥
स्थलं च तद्यत्र दिनावसाने विश्रान्तिहेतोः परितो हसन्तीम् ।
मिळन्ति हृष्टाः ज्वलनेप्रसक्ताः आवेशिकाः वृद्धिमुपैतु भूयः ॥ ७ ॥
भोज्यस्थली सा महिता च यत्र दीनाश्च दूना गृहमागताश्च ।
भजन्ति सर्वे परमोपचारं प्रवर्धतां मोदकरी चिराय ॥ ८ ॥

Blest be those feasts with simple plenty crown'd,
Where all the ruddy family around
Laugh at the jests or pranks that never fail,
Or sigh with pity at some mournful tale ;
Or press the bashful stranger to his food,
And learn the luxury of doing good.

But me, not destin'd such delights to share,
My prime of life in wandering spent and care,
Impell'd with steps unceasing to pursue
Some fleeting good, that mocks me with the view,
That, like the circle bounding earth and skies,
Allures from far, yet, as I follow, flies,
My fortune leads to traverse realms alone,
And find no spot of all the world my own.

E'en now, where Alpine solitudes ascend,
I sit me down a pensive hour to spend ;
And plac'd on high above the storm's career,
Look downwards where an hundred realms appear—
Lakes, forests, cities, plains extending wide,
The pomp of kings, the shepherd's humbler pride.

तेचापि मिष्टान्नमहा महान्तः स्वल्पव्ययेनापि कृतात्मतोषाः ।
कुटुम्बवर्गः सकलोऽपि यत्र सत्कारहेतोः परितो निषण्णः ॥ ९ ॥
सन्तोषभारादिव वा ऽनुरागनिष्यन्दतः शोणकपोलभागः ।
उच्चैर्हसन् हास्यकथाविनोदे विनिश्वसन् दुःखकथाविषादे ॥ १० ॥
प्रचोदयन्वाऽनुनयेन भोक्तुमभ्यागतान् भुक्तिविधौ सलज्जान् ।
एवं सदातिथ्यविधौ प्रसक्तो याति प्रमोदं सुकृती कृती च ॥ ११ ॥
दिने दिने वृद्धियुता भवन्त्विवत्याशास्महे ते वयमादरेण ।

अहं तु दौर्भाग्यहतोऽस्मि यस्मात्तादृक्प्रमोदानुभवो न मेऽस्ति ॥ १२ ॥
तारुण्यकालोऽपि सुखोपयोज्यः लावण्यसम्पत्तिकरो नराणाम् ।
चिन्तापरेणैव मयाहि नीतः नानाविदेशभ्रमणे वृथैव ॥ १३ ॥
यथा दिगन्तः परिदृश्यमानः चुम्बन्निव क्षोणिमुखं विदूरे ।
कुतूहलात् सन्निहितं पुमांसं प्रतारयत्येव महान्तरेण ॥ १४ ॥
तथा फलं किंचन भासमानं प्रकृष्टसौख्यास्पदमाशुलभ्यम् ।
तदीप्सया मां यतमानमद्य प्रलोभयत्येव विनाशि सद्यः ॥ १५ ॥
मद्भागधेयं त्विदमेव नान्यत् यदन्यदेशेषु परिभ्रमामि ।
सहायहीनः सुतरां च दूनः कुत्रापि वा शान्तिमनाप्नुवानः ॥ १६ ॥

अद्यापि वा'ऽऽल्प्स्'नामकपर्वतस्य श्रृंगेऽतितुङ्गे जनमुक्तसङ्गे ।
क्षणं निषीदामि मनःप्रशान्त्यै यतो विषीदामि परं चिराय ॥ १७ ॥
अहो! निषण्णः समुदग्रशृङ्गे वाताहतिर्यत्र पदं न धत्ते ।
पश्यामि नानाविधदेशभागानधःप्रदेशेषु विराजमानान् ॥ १८ ॥
सरोवराणीह सुभास्वराणि प्रकाशमानानिच पत्तनानि ।
सुदुष्प्रवेशानि च काननानि ततानि रम्याणि च शाद्वलानि ॥ १९ ॥
नराधिपा वा विभवप्रकाशात् परां मुदं यान्त्यनिशं हि यत्र ।
कृषीवला वा पशुधान्यवृद्ध्या हृषीकतोषं च कृताभिमानाः ॥ २० ॥

When thus creation's charms around combine,
Amidst the store should thankless pride repine ?
Say, should the philosophic mind disdain
That good which makes each humbler bosom vain?
Let school-taught pride dissemble all it can,
These little things are great to little man ;
And wiser he, whose sympathetic mind
Exults in all the good of all mankind.
Ye glittering towns with wealth and splendour crown'd ;
Ye fields, where summer spreads profusion round ;
Ye lakes, whose vessels catch the busy gale ;
Ye bending swains that dress the flowery vale ;
For me your tributary stores combine :
Creation's heir, the world, the world is mine !

As some lone miser, visiting his store,
Bends at his treasure, counts, recounts it o'er ;
Hoards after hoards his rising raptures fill,
Yet still he sighs, for hoards are wanting still :
Thus to my breast alternate passions rise,
Pleas'd with each good that heaven to man supplies:
Yet oft a sigh prevails, and sorrows fall,
To see the hoard of human bliss so small ;
And oft I wish, amidst the scene, to find
Some spot to real happiness consign'd,

इत्थं विधेस्सृष्टिविधौ जगत्यां विराजमाने सुभगं समन्तात् ।
जनस्सगर्वः सुखतत्परोपि शोचेत्कृतघ्नो यदि किं वदामः ॥ २१ ॥
किं वा वदामश्च मतिप्रगल्भा विगर्हयेयुर्यदि तात्त्विका वा ।
इमान् हि लाभान्परिशोभमानान् दीनात्मनां चित्तविकासहेतून् ॥ २२ ॥
शास्त्रप्रवीणा अपि दृप्तभावाः गुणानिमान्वाऽपलपन्तु कामम् ।
तथाऽप्ययं स्वल्पतरोऽपि लाभः महत्तरो दीनदशाहतानाम् ॥ २३ ॥
अहंपुनर्वच्मि तमेव धन्यं मान्यं नरं बुद्धिमतां वरं च ।
यदीयचित्तं सदयप्रवृत्ति परोपकारे परितोषमेति ॥ २४ ॥
अहो नगर्यः परिशोभमानाः दीप्रश्रिया वैभवदर्शनैश्च ।
अयि प्रदेशाः परितःप्रकाशाः वसन्तशोभातिशयेन धन्याः ॥ २५ ॥
अये मनोज्ञानि सरोवराणि विलासिलोका विहरन्ति यत्र ।
पोतानधिष्ठाय निजेष्टवृत्त्या नीतान्सुवातेन दिशागतेन ॥ २६ ॥
भो भोः पराः कर्षणवृत्तयोऽपि कृषीवलानां परितोषरूपाः ।
याभिर्नगानां सविधप्रदेशाः निरन्तरं पुष्पफलाभिरम्याः ॥ २७ ॥
यूयं समस्ता जगति प्रशस्ता धरोपहारीकृतसर्वशोभाः ।
ध्रुवं प्रिया मे जगतः प्रियस्य धनं सुतस्येव पितुः प्रियस्य ॥ २८ ॥
मितम्पचः कश्चिदुपांशु गत्वा निजं धनागारमनन्ययुक्तः ।
संख्याति सर्वाणि धनानि तत्र पुनःपुनश्चानतपूर्वकायः ॥ २९ ॥
धनोच्चयानां निचयेषु तस्य समेधमानां मुदमावहत्सु ।
तथाप्यसौ निश्वसिति प्रदीर्घं यतो धनानां निचया न पूर्णाः ॥ ३० ॥
इत्थं मदीये हृदये विरुद्धभावौ पदं सन्तनुतः क्रमेण ।
यदाहि पश्यामि नरस्य भाग्यश्रेणीः प्रक्लृप्ता जगदीश्वरेण ॥ ३१ ॥
एकैकशस्ता गणयामि चैता स्तदा मनस्तोषमुपैति भूयः ।
यदा च पश्यामि नरस्य भाग्यपारम्परी स्वल्पतरैव जाता ॥ ३२ ॥
तदा मुहुर्निश्वसितं सुदीर्घं दुःखं प्रभूतं च वहामि नित्यम् ।
अतोऽहमिच्छामि निवासहेतोः कंचित्प्रदेशं ध्रुवसौख्यमूलम् ॥ ३३ ॥

Where my worn soul, each wandering hope at rest,
May gather bliss to see my fellows blest.

But where to find that happiest spot below,
Who can direct when all pretend to know?
The shudd'ring tenant of the frigid zone
Boldly proclaims the happiest spot his own;
Extols the treasures of his stormy seas,
And his long nights of revelry and ease:
The naked negro, panting at the line,
Boasts of his golden sands and palmy wine,
Basks in the glare, or stems the tepid wave,
And thanks his gods for all the good they gave.
Such is the patriot's boast where 'er we roam,
His first, best country, ever is at home.
And yet, perhaps, if countries we compare,
And estimate the blessings which they share,
Though patriots flatter, still shall wisdom find
An equal portion dealt to all man-kind;
As different good, by art or nature given,
To different nations makes their blessings even.

Nature, a mother kind alike to all,
Still grants her bliss at labour's earnest call;
With food as well the peasant is supplied
On Idra's cliffs as Arno's shelvy side;
And though the rocky-crested summits frown,
These rocks, by custom, turn to beds of down.

प्रपश्यतो मे जनतां प्रपूर्णकामां प्रसादात्परमेश्वरस्य ।
यत्रान्तरात्मा गळितः प्रकामं सुखी च शान्तश्च भवेत् स्थिरात्मा ॥ ३४ ॥

॥ इति प्रथमो विलासः ॥

परन्तु कुत्रास्ति स भूमिभागे प्रशस्तदेशः सुखदायको वा ।
को वाऽस्ति संवेदयिता च तस्य यतोऽखिलानां हि तथाऽभिमानः ॥ ३५ ॥
यथा जनश्शीतलदेशवासी शीतालुरप्यात्मनिवासदेशम् ।
उच्चैस्समुद्घोषयति प्रकृष्टं क्षुब्धार्णवं स्वं च झषैः प्रजुष्टम् ॥ ३६ ॥
तदीयरात्रीरपि दीर्घदीर्घाः पानोत्सवैर्निर्वृतिहेतुभूताः ।
नग्नोऽपि 'नीग्रो'जन 'आफ्रिकायाः' समुच्छ्वसन् घर्मवशात् निरक्षे ॥३७॥
नखम्पचं सैकतमानुते स्वं सौवर्णवर्णं निजतालमद्यैः ।
उष्णालुरुष्णांशुकराभितापात् विशन्कवोष्णामपि वाहिनीं स्वाम् ॥ ३८ ॥
एतादृशः स्वोपकृतेः कृतज्ञः प्रस्तौति हृष्टो निजदैवतानि ।
देशाभिमानी भवतीत्थमेव सर्वोऽपि लोके यदि पर्यटामः ॥ ३९ ॥
स्वजन्मभूमिः प्रथमा परा च स्वर्गाधिका चाऽपि भवत्यमुष्य ।
देशा विभिन्नास्तुलितास्तथाऽपि परीक्षिताश्चापि गुणा यदि स्युः ॥ ४० ॥
प्रायेण विद्वान् कुरुतेऽत्र भावं समप्रभावं स्तुवतोऽभिमन्तुः ।
परन्तु केचित् कृषितः प्रकृष्टाः केचिच्च शिल्पादिकलाप्रपुष्टाः ॥ ४१ ॥
इत्थं हि देवेन समानमेव सुरक्षितास्संति विभिन्नदेशाः ।

जगद्विधात्री जननीव पुत्रान् दयार्द्रभावा सममेव सर्वान् ॥ ४२ ॥
पुष्णाति निष्णाततरा यदि स्युः प्रातिस्विके कर्मणि ते प्रवृत्ताः ।
यथा नदीमातृकदेशवर्ती कृषीवलो लम्भितधान्यपूर्तिः ॥ ४३ ॥
तथा शिलास्थानगकर्मकारो ऽप्यातोदनर्द्धिः भजते प्रमोदम् ।
आदावसौ यद्यपि शैलकूटः भ्रूभङ्गपातं परिपश्यतीव ॥ ४४ ॥
तथाऽपि कालक्रमतो मनुष्यैः विभाव्यते कोमलतल्पकल्पः ।

From art more various are the blessings sent—
Wealth, commerce, honour, liberty, content.
Yet these each other's power so strong contest,
That either seems destructive of the rest.

Where wealth and freedom reign, contentment fails,
And honour sinks where commerce long prevails
Hence every state to one lov'd blessing prone,
Conforms and models life to that alone.
Each to the favourite happiness attends;
And spurns the plan that aims at other ends;
Till carried to excess in each domain,
This favourite good begets peculiar pain.

But let us try these truths with closer eyes,
And trace them through the prospect at it lies:
Here for a while my proper cares resign'd,
Here let me sit in sorrow for mankind;
Like yon neglected shrub at random cast,
That shades the steep, and sighs at every blast.

For to the right, where Apennine ascends,
Bright as the summer, Italy extends:
Its uplands sloping deck the mountain's side,
Woods over woods in gay theatric pride;
While oft some temple's mould'ring tops between
With venerable grandeur mark the scene.

कला जगत्यां जनयन्त्यनन्तफलानि चात्माश्रयतोषणानि ॥ ४५ ॥
यथा प्रतिष्ठा धनिता वणिज्या स्वतन्त्रता चापि पराऽऽत्मतुष्टिः ।
तथाप्यऽमू स्सम्मिळिता यदि स्युः तथा यतन्ते कलहे मिथो हि ॥ ४६ ॥
यथा भवत्येकतमाऽपि तासां विनाशहेतुस्सततं परासाम् ।

यत्र प्रदेशे धनिता स्वतन्त्रभावश्च यातः प्रभुतां कदाचित् ॥ ४७ ॥
तत्रात्मतुष्टिः नितरां परास्ता वाणिज्यतस्सीदति गौरवं च ।
अतो हि देशो विविधो यथेच्छमेकैकवृत्त्याश्रयणे प्रसक्तः ॥ ४८ ॥
आत्मानमुद्योजयति प्रकामं परानुदस्यन्यजनस्य वृत्तिम् ।
ततश्च यावद्व्रजते दुरन्तं दुःखं तयाऽत्यादतयाऽवसाने ॥ ४९ ॥

वयं पुनः सूक्ष्मविचारदृष्ट्या पश्याम सर्वानिह वास्तवांशान् ।
संशोधयामापि फलान्यमीषां यथावदस्मात्परितः स्थितानाम् ॥ ५० ॥
अत्र क्षणं चोपविशानि सर्वा मदीयचिन्ता स्सहसाविधूय ।
जनान् विशोचन् जगतीतलस्थान् विवेकहीनान् विविधप्रवृत्तीन् ॥ ५१ ॥
वीरुद्यथाऽसौ शिखरे लुठन्ती नरादरं क्वाप्यनवाप्नुवाना ।
अनुक्षणं वातवशात् चलन्ती विनिश्वसन्तीव विलोक्यमाना ॥ ५२ ॥

॥ इति द्वितीयो विलासः ॥

सन्दृश्यते दक्षिणतो विदूरे ग्रीष्मप्रभोऽसौ "इटली" प्रदेशः ।
अभ्रंलिहो राजति यस्य पार्श्वे श्रीमानसौ "आपिनि" शैलराजः ॥ ५३ ॥
यत्राभिरम्याः कटकप्रदेशाः वनश्रिया भान्ति हसन्निवेशाः ।
तिरस्करिण्यावलिसम्पदेव रङ्गप्रदेशा नयनाभिरामाः ॥ ५४ ॥
देवालयानां शिखराणि यत्र सन्दृश्यमानानि च तत्र तत्र ।
जीर्णान्यपूर्णानि परं महान्ति पवित्रतां साधु विबोधयन्ति ॥ ५५ ॥

Could nature's bounty satisfy the breast,
The sons of Italy were surely blest.
Whatever fruits in different climes are found,
That proudly rise, or humbly court the ground;
Whatever blooms in torrid tracts appear,
Whose bright suceession decks the varied year;
Whatever sweets salute the northern sky
With vernal lives, that blossom but to die;
These here disporting own the kindred soil,
Nor ask luxuriance from the planter's toil;
While sea-born gales their gelid wings expand
To winnow fragrance round the smiling land.

But small the bliss that sense alone bestows,
And sensual biss is all the nation knows.
In florid beauty groves and fields appear,
Man seems the only growth that dwindles here.
Contrasted faults through all his manners reign:
Though poor, luxurious; though submissive, vain;
Though grave, yet trifling; zealous, yet untrue;
And e'en in penance planning sins anew.
All evils here contaminate the mind,
The opulence departed leaves behind;
For wealth was theirs, not for remov'd the date,
When commerce proudly flourish'd through the state;
At her command the palace learnt to rise,
Again the long-fall'n column sought the skies,
The canvas glow'd beyond e'en Nature warm,

यदि प्रतुष्टा निजभागधेयैः जगद्विधात्रया विहितैर्भवेयुः ।
ध्रुवं तदैता "इटली"प्रजा हि धन्याश्च मान्याश्च परं भवेयुः ॥ ५६ ॥
विभिन्नदेशेषु फलानि यानि सन्दृश्यमानानि लताद्रुमेषु ।
पुष्पाणि वा घर्मविदेशजानि नानाऋतूनां श्रियमावहन्ति ॥ ५७ ॥
अन्यानि वा यानि समुद्गमन्ति रम्यं निजामोदभरं समन्तात् ।
वसन्तकाले विकसन्ति मुग्धं वृथैव भूम्युत्तरभागजानि ॥ ५८ ॥
एतानि सर्वाणि विना प्रयत्नं संरोपकस्यात्र समुद्भवन्ति ।
सम्भावयन्तीव तमेव देशं स्वजन्मदेशं विधिना प्रक्लृप्तम् ॥ ५९ ॥
समुद्रजातेषु सुखं वहत्सु मन्दं च वातेषु कणान् वहत्सु ।
तान्स्मेरदेशान् परितश्चरत्सु मनोहरामोदभरान् किरत्सु ॥ ६० ॥

यद्यप्यसारं विषयेषु सौख्यमाशुप्रणाशं च मतं परेषाम् ।
हृषीकजन्यं सुखमेव तेषां प्रियं यतोऽन्यन्नतु दृष्टमेषाम् ॥ ६१ ॥
पुष्पश्रिया सन्ततमण्डितेषु क्षेत्रेषु चारण्यतलेषु यत्र ।
नराः परं क्षीणदशाभिभूताः विरुद्धदुर्भावविदूषिताश्च ॥ ६२ ॥
दीना अपि स्वादृतभोगवर्गाः प्रह्वा अपि स्वीकृतदम्भमार्गाः ।
गभीरचित्ता अपि बालवृत्ताः उत्साहयुक्ता अपि सत्यमुक्ताः ॥ ६३ ॥
बकाद्बिडालादथवा किमेते समात्तशिक्षा गुरवस्तयोर्वा ॥
व्रते स्थितानामपि यद्विशुद्ध्यै चेतः श्रयन्ते नवपापचिन्ताः ॥ ६४ ॥
श्रिया ह्रिया किंनु जुगुप्सया नु भिया नु वाऽन्यत्र यियासया नु ।
त्यक्तेषु सक्तेषु कुभोगवर्गे नक्तंदिवं मुक्तमहाशयेषु ॥ ६५ ॥
दोषा अशेषा इव तीव्ररोषाः चित्तं प्रमत्तं परिदूषयन्ति ।
यतस्त्वमी नातिचिराय काले वित्तेन मत्तेभसमा विरेजुः ॥ ६६ ॥
यदाऽत्र वाणिज्यकला विशालं समेधमाना मुमुदे सहेलम् ।
जनाश्च सर्वे पृथुवैभवेन चकाशिरे तर्हि तदुद्भवेन ॥ ६७ ॥

The pregnant quarry teem'd with human form ;
Till, more unsteady than the southern gale,
Commerce on other shores display'd her sail ;
While nought remain'd of all the riches gave,
But towns unmann'd, and lords without a slave :
And late the nation found with fruitless skill
Its former strength was but plethoric ill.

Yet still the loss of wealth is here supplied
By arts, the splendid wrecks of former pride :
From these the feeble heart and long fall'n mind
An easy compensation seem to find.
Here may be seen, in bloodless pomp array'd,
The paste-board triumph and the cavalcade :
Processions form'd for piety and love,
A mistress or a saint in every grove:
By sports like these are all their cares beguil'd;
The sports of children satisfy the child ;
Each nobler aim, represt by long control,
Now sinks at last, or feebly mans the soul ;
While low delights succeeding fast behind,
In happier meanness occupy the mind :
As in those domes, where Cæsars once bore sway,

समुज्ज्वलाभ्रङ्कषचन्द्रशालाः अनेकभूमा नृपसौधशालाः ।
निर्माय लोकातिशयेन भूम्ना विरेजिरे भासुररत्नधाम्ना ॥ ६८ ॥
उद्दध्रिरे चापि विशीर्णजीर्णाः स्तम्भाश्चिरं भास्वरवर्णकीर्णाः ।
चित्रक्रियाश्चापि गतास्सुपुष्टिं बभासिरेऽतील्य विधातृसृष्टिम् ॥ ६९ ॥
शिलाखनिश्चापि गृहीतबिम्बान् प्रसूरिवासूत मनुष्यबिम्बान् ।
यावद्वणिज्याऽत्र बभौ सशंसा यावद्ययौ नाधिकलोलतां सा ॥ ७० ॥
तटिल्लतादक्षिणमारुताभ्यां यावच्च नीता न परैर्भुजाभ्याम् ।
ततःपरं सर्वमपि प्रणष्टं धनप्रयुक्तं न हि किंच शिष्टम् ॥ ७१ ॥
जहुः पुरीः सर्वजना हताशाः दासैर्विहीनाश्च बभूवुरीशाः ।
अहो! जनाः पश्चिमबुद्धियुक्ताः यन्मेनिरेऽमी धनमादमुक्ताः ॥ ७२ ॥
सर्वाऽप्यखर्वा स्वपुरार्जितश्रीः मोहाय वै शोथरुजेव जाता ।

एषां स्वभाग्यक्षतिपूरणं हि कियत्प्रमाणेन भवेत् तथापि ॥ ७३ ॥
शिल्पक्रियाणामतिशीर्णभागैः मनोहराणां विभवोत्थितानाम् ।
एतैः परं जीर्णविदीर्णभागैः नित्यालसानामतिलम्पटानाम् ॥ ७४ ॥
चिरायविष्टम्भविलुप्तशक्तिः आत्मा प्रमोदं भजते सुखेन ।
युद्धक्रियाभिः स्वमुदे कृताभिः क्षतैर्विहीनाभिरदीनताभिः ॥ ७५ ॥
अश्वावळीभिर्ललितं च मुग्धं प्रचोदिताभिर्गतिभेदवृत्त्या ।
अन्याभिरप्यात्मविडम्बनाभिः केलीभिरेते क्षपयन्ति कालम् ॥ ७६ ॥
आरामपालीषु विरामभाजां तपस्विनां वा निजवल्लभानाम् ।
प्रसादनार्थे श्रितदम्भयोगाः वीथीषु वीथीषु जनास्त्वरन्ते ॥ ७७ ॥
एतादृशस्वात्मविनोदमग्नाश्चिन्ता दुरन्ता अपि विस्मरन्ति ।
यतोऽधिकं बालकचेष्टितानि प्रियाण्यमीषामतिबालिशानाम् ॥ ७८ ॥
सर्वाऽपि चार्वाशयतः प्रवृत्तिः चिरात्पराभूततयाऽस्तभित्तिः ।

Defac'd by time and tott'ring in decay,
There in the ruin heedless of the dead,
The shelter-seeking peasant builds his shed ;
And, wondering man could want the larger pile,
Exults, and owns his cottage with a smile.

My soul, turn from them, turn we to survey
Where rougher climes a nobler race display,
Where the bleak Swiss their stormy mansion tread,
And force a churlish soil for scanty bread ;
No product here the barren hills afford
But man and steel, the soldier and his sword ;
No vernal blooms their torpid rocks array,
But winter lingering chills the the lap of May ;
No zephyr fondly sues the mountain's breast,
But meteors glare, and stormy glooms invest.

Yet still, e'en here, content can spread a charm,
Redress the clime, and all its rage disarm.
Though poor the peasant's hut, his feast tho' small,
He sees his little lot the lot of all ;
Sees no contiguous palace rear its head
To shame the meanness of his humble shed ;

सन्नाऽवसाने हृदयेऽर्थवैषु खिन्ना स्थिता दुर्बलवृत्तिगेषु ॥ ७९ ॥
ग्राम्योपभोगास्त्वरितानुयान्तश्चेतांस्यमीषां सुसुखं विशन्ति ।
तेषु प्रदेशेषु नृपा हि येषु "रोमन्"जनानां समदं शशासुः ॥ ८० ॥
ये सम्बभूवुर्बत कालगत्या सन्नाश्च जीर्णाश्च जनैर्विसृष्टाः ।
कृषीवलाः स्वाश्रयलिप्सवोऽमी तेषां पुरावृत्तकथाऽनभिज्ञाः ॥ ८१ ॥
कुटीरशाला विरचय्य तत्र सुखं वसन्तो मनसि स्मयन्ते ।
नरः कुतः कामयते वृथैव हर्म्याण्यतोवेति च विस्मयन्ते ॥ ८२ ॥

॥ इति तृतीयो विलासः ॥

निवर्तयामो हृदयं तदेभ्यः निरूपयामश्च तदन्यदेशम् ।
यत्रोत्तराः 'स्विस्'मनुजा वसन्ति यस्मिंश्च वाताश्शिशिरा वहन्ति ॥ ८३ ॥
यत्राल्पमेवान्नमिला प्रसूते श्रमेण कृष्टाऽपि निजप्रसूतेः ।
यदत्र देशाः गिरिकूटदेशाः तदूषदेशाश्च मुधा जनाशाः ॥ ८४ ॥
परं निवासोऽयमयस्खनीनां सुयोधिनां चैव वयोधनानाम् ।
वसन्तकालेऽपि हसन्ति वाऽत्र न कानि पुष्पाणि विकासवन्ति ॥ ८५ ॥
हेमन्तकालस्तु नितान्तवर्ती निदाघकालेऽपि पदानुवर्ती ।
न मन्दवातोऽपि मरन्दवाही सुखं ददानः परिवाति वाऽत्र ॥ ८६ ॥
अभ्राण्यशुभ्राणि जलैरदभ्राण्यावृण्वते सन्तमसायितानि ।
मुहुर्मुहुश्चाऽपि तटिच्छटासु देदीप्यमानासु तटीकुटीषु ॥ ८७ ॥
इत्थं हि भावाः कठिनस्वभावाः गिरिप्रदेशे जनदुष्प्रवेशे ।

तथाऽप्यलं राजति सर्वदेशे यथार्थतुष्टिः निजभागधेयैः ॥ ८८ ॥
यया जनाः देशगुणप्रयुक्तान् भयावहान् क्लेशगणान् सहन्ते ।
कुटीगणाः वेत्रपुटीसमानाः अन्नं कदन्नं च भवन्त्यमीषाम् ॥ ८९ ॥
तथाऽप्यमी स्वल्पमिदं स्वभाग्यं स्वदेशसामान्यतया विदन्तः ।
विन्दान्ति तृप्तिं परमां च दृप्तिमनन्यसामान्यतया भजन्ते ॥ ९० ॥

No costly lord the sumptuous banquet deal,
To make him loathe his vegetable meal;
But calm, and bred in ignorance and toil,
Each wish contracting, fits him to the soil.
Cheerful at morn, he wakes from short repose,
Breaths the keen air, and carols as he goes;
With patient angle trolls the finny deep;
Or drives his venturous ploughshare to the steep;
Or seeks the den where snow-tracks mark the way,
And drags the struggling savage into day.
At night returning, every labour sped
He sits him down the monarch of a shed;
Smiles by his cheerful fire, and round surveys
His children's looks, that brighten at the blaze;
While his lov'd partner boastful of her hoard,
Displays her cleanly platter on the board:
And haply too, some pilgrim, thither led,
With many a tale repays the nightly bed.

Thus every good his native wilds impart
Imprint the patriot passion on his heart;
And e'en those ills, that round his mansion rise,
Enhance the bliss his scanty fund supplies.
Dear is that shed to which his soul conforms,
And dear that hill which lifts him to the storms;
And as a child, when scaring sounds molest,

यतस्समीपे नहि किंचिदस्ति हर्म्यं स्वधर्म्यं स्वकुटीरजन्यम् ।
व्यपोहितुं स्वात्मगतं प्रमोदं नृपोऽपि वा कोऽपि न सन्निधत्ते ॥ ९१ ॥
मिष्टान्नदानेन यथेष्टमेतान् भ्रष्टात्मतुष्टीनशने च कर्तुम् ।
परन्तु शान्ताः कृषिकर्मदान्ताः विद्याविहीना अपि साभिमानाः ॥ ९२ ॥
यदेव तेषामनुगामि धर्मं तदेव ते तुष्टतया भजन्ते ।
निशां च नीत्वा मितनिद्रयैव निशाऽवसाने झडिति प्रबुद्धाः ॥ ९३ ॥
उल्लासयुक्ताः शुचिवातसेवाः सस्वैरगानाः स्वपथं श्रयन्ते ।
गृह्णन्ति मत्स्यानथवाजलेषु मौनीभवन्तो बडिशप्रयोगात् ॥ ९४ ॥
कर्षन्ति यद्वा दृढमद्रिभूमिं हलेन तीक्ष्णायतवक्त्रभाजा ।
मृग्यन्ति वा श्वापदकन्दराणि पदानुसारेण हिमप्रदेशे ॥ ९५ ॥
विद्राव्य तानन्तरतो बहिर्वा समागतान् घ्नन्ति विचेष्टमानान् ।
इत्थं स्वकार्याणि समाप्य सायं स्वाःस्वाः कुटीः प्राप्य नृपाविशेषम् ॥ ९६ ॥
हसन्तिकामेत्य हसन्मुखाः स्वान् लसन्मुखान् मुग्धशिशून् प्रभातः ।
पश्यन्ति हृष्यन्ति च साभिमानाः चिन्ताश्रमैरित्थमिमे विहीनाः ॥ ९७ ॥
तदैव तेषामपि वल्लभासु स्वभागधेयस्मयमानसासु ।
पात्राणि नेत्राविकतोषणानि भोज्यप्रयोज्यानि च मृन्मयानि ॥ ९८ ॥
दक्षं दधानासु च दारवेषु पीठेषु भुक्त्यै परिकल्पितेषु ।
अभ्यागतः कश्चन मार्गगत्या समागतश्चेत् सहसा तदानीम् ॥ ९९ ॥
आख्याति तेषां विविधाः कथाः स्वाः प्रसादनाः स्वात्मनिवासहेतोः ।

एतादृशस्वेष्टफलप्रदानात् गाढां रतिं ते दधते स्वदेशे ॥ १०० ॥
शिलोच्चयास्तेऽपि समुत्थिता ये कुटीरवीथीं परितः स्वकीयाम् ।
समेधयन्ते निजदेशरागं स्वमेव सौख्यं च मितान्नयोगम् ॥ १०१ ॥
ये वा चिरस्वाभ्युषिताः कुटीराः ते चाप्यमीषां परमं प्रियाः स्युः ।
ये वाऽपि शैला हिमवर्षलोलाः तेचाप्यमीषां परमं प्रियाः स्युः ॥ १०२ ॥
यथा शिशुः कंचन तीव्रशब्दं शृण्वन् हठादेव तु भीतभीतः ।

Clings close and closer to the mother's breast,
So the loud torrent, and the whirlwind's roar,
But bind him to his native mountains more.

Such are the charms to barren states assign'd ;
Their wants but few, their wishes all confin'd.
Yet let them only share the praises due,
If few their wants their pleasures are but few ;
For every want that stimulates the breast,
Becomes a source of pleasure when redrest.
Hence from such lands each pleasing science flies,
That first excites desires and then supplies ;
Unknown to them, when sensual pleasures cloy,
To fill the languid pause with finer joy ;
Unknown those powers that raise the soul to flame,
Catch every nerve, and vibrate through the frame.
Their level life is but as mouldering fire,
Unquenched by want, unfann'd by strong desire ;
Unfit for raptures, or, if raptures cheer
On some high festival of once a year,
In wild excess the vulgar breast takes fire,
Till, buried in debauch, the bliss expire.

But not their joys alone thus coarsely flow,
Their morals, like their pleasures, are but low ;
For, as refinement stops, from sire to son,

प्रधाव्य मातुर्हृदि लीनलीनः ध्यायन् तमेव स्तनमीलिताक्षः ॥ १०३ ॥
तथैव सेयं जनताऽपि नित्यं यथा यथाऽऽकर्णयते महान्तम् ।
भयङ्कराणां गिरिनिर्झराणां वात्यावळीनामपि घोरघोषम् ॥ १०४ ॥
तथा तथा स्वीयगिरिप्रदेशे प्रबद्धरागा भवतीति चित्रम् ! ।

एते हि सौभाग्यगुणा लसन्ति "स्विड्जर्"प्रदेशे विफलप्रदेशे ॥१०५॥
फलोदयस्याल्पतया तदीया मनोरथाश्चापि मिता भवन्ति ।
तथाऽपि तेचाप्यनुरूपनैजगुणप्रशंसाविषया भवेयुः ॥ १०६ ॥
फलोद्गमाः स्वल्पतरा यदि स्युः मनोरथाश्चापि परं मिताः स्युः ।
यतो हि कामाः हृदयप्रचोदाः फलोन्मुखा एव मुदाकराः स्युः ॥ १०७ ॥
ततश्च विद्या मतिदूरएव या पूर्वमुत्पाद्य विभिन्नकामान् ।
पश्चात् स्वसामर्थ्यवशात्स्वयं तान् प्रसाधयेत् तादृशदेशभागे ॥ १०८ ॥
सुखानि वा वैषायिकानि तेषां परं जुगुप्साजनकानि चेत्स्युः ।
अमी न जानन्ति कलादिसङ्गात् उद्वेजितस्वात्मविनोदनं वा ॥ १०९ ॥
ताश्चाऽपि विद्याः मतिमार्गदूराः या वा शरीरं परितः प्रविश्य ।
प्रोत्साहयन्तीव समुद्यमाय नरं दृढाबद्धफलानुरागम् ॥ ११० ॥
तेषां च रीतिस्सततैकरीतिः प्रसुप्तदाहाग्निगतेव रीतिः ।
नेयं प्रशान्ताऽऽन्तरदाहयोगात् न वोज्ज्वलोद्दीपनवस्त्वसङ्गात् ॥ १११ ॥
नार्हन्ति वाऽमी कमपि प्रमोदं यतः प्रमोदानुभवे रताश्चेत् ।
महोत्सवे वत्सरमद्वितीये प्रवर्तितेऽत्यादरसम्भ्रमाभ्याम् ॥ ११२ ॥
निषेवमाणाः मधुमद्यमांसद्रव्याणि रात्रिंचरनिर्विशेषम् ।
मत्ताश्च मन्दाश्च तथा भवन्ति यथोत्सवानन्दभराच्चयवन्ते ॥ ११३ ॥

नचैव तेषां प्रसरन्ति हर्षाः एवं सदा नीचपथप्रवृत्ताः ।
नीतिश्च तेषामतिहीनरीतिः रीतिर्यथा स्वर्णसवर्णरीतिः ॥ ११४ ॥
यस्मादनूचानगतिक्रमेण समागता याऽन्धपरम्परेव ।

Unalter'd, unimprov'd, the manners run;
And love's and friendship's finely-pointed dart
Fall, blunted, from each indurated heart.
Some sterner virtues o'er the mountain's breast
May sit, like falcons cowering on the nest;
But all the gentler morals, such as play
Thro' life's more cultur'd walks, and charm the way,
These, far dispers'd, on timorous pinions fly,
To sport and flutter in a kinder sky.

To kinder skies, where gentler manners reign,
I turn; and France displays her bright domain.
Gay, sprightly land of mirth and social ease,
Pleas'd with thyself, whom all the world can please,
How often have I led thy sportive choir,
With tuneless pipe, beside the murmuring Loire!
Where shading elms along the margin grew,
And freshened from the wave the zephyr flew;
And haply, though my harsh touch faltering still,
But mocked all tune, and marred the dancer's skill;
Yet would the village praise my wondrous power,
And dance, forgetful of the noontide hour.
Alike all ages. Dames of ancient days
Have led their children through the mirthful maze,
And the gay grandsire, skilled in gestic lore,
Has frisked beneath the burthen of threescore.

न शोधिता वा न परिष्कृता वा तामेव रीतिं तइमे श्रयन्ते ॥ ११५ ॥
सौजन्यसौहार्दपरानुकम्पाः एषां हृदः क्रौर्यभियेव दूराः ।
शौर्यादिभावाः कठिनस्वभावाः यद्यप्यमीषां गिरिदेशभाजाम् ॥ ११६ ॥
कामं वसेयुः हृदये यथावा श्येनाः स्वनीडे परिकुञ्चिताङ्गाः ।
परन्तु ते कोमलरूपधर्माः दयादयो ये नररूपधर्माः ॥ ११७ ॥
विद्याऽनवद्यात्मविहारशीलाः कलाविलासाश्रयकेळिलोलाः ।
दूरं परास्ताः मधुरस्वभावान् नरान्परान्प्राप्य परं रमन्ते ॥ ११८ ॥
वसन्तसम्मोदिशरद्विहाराः विहङ्गमाः देशविधर्मभीताः ।
यथा डयित्वा विहरन्ति कामं पक्षान् धुवन्तो रुचिरप्रदेशे ॥ ११९ ॥

॥ इति चतुर्थो विलासः ॥

प्रवर्तयामो निजचित्तमेभ्यः तम् " फ्रान्स् " प्रदेशं बहुरम्यदेशम् ।
यद्वासिनां स्निग्धतराः प्रकाराः लोकोत्तरास्सन्ति विराजमानाः ॥ १२० ॥
वसुन्धरे श्लाघ्यनरे भवत्याः प्रजा इमा उज्ज्वलचित्तवृत्ताः ।
दयाळवो रक्षितमित्रधर्माः स्वयं प्रतुष्टा इतरैश्च तोष्याः ॥ १२१ ॥
अनेकवारं तव नर्तकौघान् विलासयुक्तान् समचोदयं हि ।
वंशेन मे काललयप्रहाणादरञ्जनेनापि तटे तटिन्याः ॥ १२२ ॥
" ल्वार् " नामिकायाः सुभगं क्वणन्त्याः यस्यास्तटारोहिनमेरुवृक्षाः ।
बभुर्विशालाः सुववौ च शीतः मन्दं च मन्दं च सुगन्धिवातः ॥ १२३ ॥
यदि प्रमादात् मम कौशलस्य पर्याप्तयभावाच्च ममैव वाद्यम् ।
विदूषयामास तदीयनाट्यस्वारस्यसर्वस्वमथापि तेऽमी ॥ १२४ ॥
ग्राम्या जना मन्निपुणत्वमेव परं स्तुवन्तो ननृतुश्चिराय ।
आबालवृद्धं गगनान्तरालरविप्रभावेगमचिन्तयन्तः ॥ १२५ ॥
वृद्धाङ्गनाः स्वात्मशिशून् समेत्य विचित्रगत्या ननृतुस्सहर्षम् ।
वृद्धाश्च ते षष्टिवयोऽभिभूताः ये नाट्यशास्त्रे नितरां विदग्धाः ॥ १२६ ॥
स्वैरं सहर्षं सरसं सहेलं युवाऽविशेषं च चिरादनृत्यन् ।

So blest a life these thoughtless realms display;
Thus idly busy rolls their world away.
Theirs are those arts that mind to mind endear,
For honour forms the social temper here;
Honour, that praise which real merit gains,
On even imaginary worth obtains,
Here passes current ; paid from hand to hand,
It shifts in splendid traffic round the land:
From courts to camps, to cottages it strays,
And all are taught an avarice of praise;
They please, are pleased, they give to get esteem,
Till, seeming blest, they grow to what they seem.

But while this softer art their bliss supplies,
It gives their follies also room to rise;
For praise too dearly loved, or warmly sought,
Enfeebles all internal strength of thought:
And the weak soul within itself unblest,
Leans for all pleasure on another's breast.
Hence ostentation here, with tawdry art,
Pants for the vulgar praise which fools impart;
Here vanity assumes her pert grimace,
And trims her robes of frieze with copper lace;
Here beggar pride defrauds her daily cheer,
To boast one splendid banquet once a year:
The mind still turns where shifting fashion draws,
Nor weighs the solid worth of self-applause.

एवं विचिन्तास्सुसुखं वसन्ति विनोदमग्ना विधुरा न सन्ति ॥ १२७ ॥
नित्यालसे कर्माणि तत्पराणामायुष्यचक्रं वहते नराणाम् ।
सौहार्दरम्या भवति प्रवृत्तिः नित्यं परावर्जनभव्यरीतिः ॥ १२८ ॥
आत्मप्रतिष्ठा स्तुतिपात्रमत्र यथार्थतो वाऽप्ययथार्थतो वा ।
अर्हाऽस्तु वा माऽस्तु भवत्वनर्हा प्रचाल्यमाना भुवि नाणिकेव ॥ १२९ ॥
नृपेषु भृत्येषु पुरीषु तद्वद्ग्रामेषु वा पात्रविचारशून्या ।
परार्ध्यवाणिज्यगतिक्रमेण प्रवर्तते स्वैरविहारशीला ॥ १३० ॥
स्तोत्रप्रियत्वे किमु सर्वएव सुशिक्षितास्तत् परमाद्रियन्ते ।
यतः परान् प्रीतिपरान् विधाय स्वयं च तेषां दयिता भवन्ति ॥ १३१ ॥
सम्मानयन्तः प्रथमं स्वयं तान् ततश्च तेषां महिता भवन्ति ।
समाचरन्तस्तइमे सदेत्थं यथार्थतोऽन्ते हि भवन्ति मान्याः ॥ १३२ ॥

परन्तु रम्येऽपि विधेयमार्गे निरन्तरं सम्भृतमोदवर्गे ।
विहारभाजां हृदयेषु दोषाः पतन्त्यमित्रा इव तीव्ररोषाः ॥ १३३ ॥
यतः प्रशंसा परमादृता वा परादरणेयमपेक्षिता वा ।
विकुण्ठयत्यात्मनि सर्वशक्तिं विचारशक्तिश्च भजेद्विमुक्तिम् ॥ १३४
यदा पुमान् दुर्बलचित्तवृत्तिः तदाऽन्यचित्तानुगनैजवृत्तिः ।
अतोऽत्र सर्वा जनताऽप्यसत्या निजप्रवृत्त्या परमोदवत्या ॥ १३५ ॥
मृषाऽऽत्मशंसास्पृहयन्मनीषा प्रतार्यते मूर्खजनैस्सदैषा ।
वृथाऽभिमानोऽत्र मुधाऽट्टहासं तनोत्यनीचैर्विगलाज्जिहासम् ॥ १३६ ॥
यतोऽत्र सर्वेऽपि विलासहेतोः प्रावारयन्ते निजदेहयष्टीः ।
परिष्कृताभिः सुभगं दशाभिः सशौल्बरेखाभिरसत्पटीभिः ॥ १३७ ॥
भैक्षाशना अप्यधिकाभिमानाः मिष्टान्नमिष्टानलमाशयन्ति ।
एकैकवारं खलु वत्सरस्य न्यूनीकृतस्वाह्निकभुक्तियोगाः ॥ १३८ ॥
कालानुरूपं कलयन्ति रूपं यथार्थरूपं तु हतस्वरूपम् ।
न तोलयन्त्यात्मगतं प्रभावं गता इमे स्वस्तुतिरक्तभावम् ॥ १३९ ॥

॥ इति पञ्चमो विलासः ॥

To men of other minds my fancy flies,
Embosomed in the deep where Holland lies.
Methinks her patient sons before me stand,
Where the broad ocean leans against the land;
And, sedulous to stop the coming tide,
Lift the tall rampire's artificial pride.
Onward, methinks, and diligently slow,
The firm connected bulwark seems to grow,
Spreads its long arms amidst the watery roar,
Scoops out an empire, and usurps the shore;
While the pent ocean rising o'er the pile,
Sees an amphibious world beneath him smile;
The slow canal, the yellow-blossom'd vale,
The willow-tufted bank, the gliding sail,
The crowded mart, the cultivated plain,
A new creation rescued from his reign.

Thus while around the wave-subjected soil
Imples the native to repeated toil,
Industrious habits in each bosom reign,
And industry begets a love of gain,
Hence all the good from opulence that springs,
With all those ills superfluous treasure brings,
Are here displayed. Their much-lov'd wealth imparts,
Convenience, plenty, elegance, and arts;
But view them closer, craft and fraud appear,

इतःपरं धावति भावना मे "हालेण्ड्"प्रदेशं रमणीयदेशम् ।
यस्सागराभ्यन्तरएव शेते यत्र प्रजा भिन्नरुचिं च गाते ॥ १४० ॥
प्रजास्तदीयाः श्रमकार्यसक्ताः स्थिता इवाग्रे मम शान्तियुक्ताः ।
यत्राम्बुधिर्भाति विशालभागः निजोपधानीकृतभूविभागः ॥ १४१ ॥
किंचात्र पश्यामि व तान् ममाग्रे समुद्यता ये नितरां तदग्रे ।
निरोद्धुकामा जलधेस्तमोघं सेतुं महान्तं रचयन्त्यमोघम् ॥ १४२ ॥
ततस्तदग्रे च विवर्धमानं क्रमेण सेतुं दृढबध्यमानम् ।
यस्योपशाखाः जलधिं नदन्तं प्रविश्य सर्वानिव तर्जयन्तम् ॥ १४३ ॥
उत्सार्य वाहाइव तं सुदूरं स्थिताइवाक्रम्य च तस्य तीरम् ।
तदा स दूरं जलधिः प्रणुन्नः आरुह्य तत्सेतुतटं विषण्णः ॥ १४४ ॥
अधःप्रदेशेषु विराजमानं प्रपश्यतीवात्मविदेशमेनम् ।
यत्र प्रदेशे नवलब्धकोशे समुद्रराजस्य पुरानिवेशे ॥ १४५ ॥
मन्दं वहन्त्यो विलसन्ति कुल्याः उपत्यकाः पीतसुमैरतुल्याः ।
तटप्रदेशास्तरुसावतंसाः नावश्च मन्दा इव राजहंसाः ॥ १४६ ॥
जनाकुला मञ्जुलहट्टदेशाः सस्यप्रदाश्चापि समप्रदेशाः ।
एतानि सर्वाणि मनुष्यसृष्टिः दैवीव या राजति सर्वतुष्टिः ॥ १४७ ॥

एवं समुद्राहतिभीतिमत्सु पदे पदे रक्षणकर्मवत्सु ।
सर्वेषु तत्रत्यजनेषु चित्ते क्रियास्वभावाः विभवन्त्यमत्ते ॥ १४८ ॥
उद्योगिताचेयमनन्यवृत्त्या युनक्त्यमून् श्रेष्ठफलाप्तिरत्या ।
अतो गुणा वा धनतः प्रयुक्ताः दोषाश्च वा तद्विपुलत्वजाताः ॥ १४९ ॥
कुर्वन्त्यमीषां हृदयेषु नित्यं परस्परस्पर्धिनिजाधिपत्यम् ।
तेषामतिप्रेमपदं हिरण्यं ध्रुवं तनोत्येव सुखं वरेण्यम् ॥ १५० ॥
समृद्धिसौभाग्यकलाविलासानपि प्रसूते सह बुद्धिभासा ।
यदि प्रपश्येरिह सूक्ष्मदृष्ट्या तदा वदेर्दोषगणान् समष्ट्या ॥ १५१ ॥

E'ven liberty itself is barter'd here.
At gold's superior charms all freedom flies,
The needy sell it, and the rich man buys;
A land of tyrants, and a den of slaves,
Here wretches seek dishonourable graves,
And, calmly bent, to servitude conform,
Dull as their lakes that slumber in the storm.

Heavens! how unlike their Belgic sires of old!
Rough, poor, content, ungovernably bold:
War in each breast, and freedom on each brow;
How much unlike the sons of Britain now!

Fir'd at the sound, my genius spreads her wing,
And flies where Britain courts the western spring;
Where lawns extend that scorn Arcadian pride,
And brighter streams than fam'd Hydaspes glide;
There all around the gentlest breezes stray,
There gentlest music melts on every spray;
Creation's mildest charms are there combin'd:
Extremes are only in the master's mind.
Stern o'er each bosom reason holds her state
With daring aims irregularly great;

प्रलोभकौटिल्यपदद्वयेन यतोन्यदोषा हि भवन्त्यनेन ।
स्वच्छन्दवृत्तिं च पराश्रयां ते तृष्णानदीष्णाः कलयन्ति वित्ते ॥ १९२ ॥
स्वतन्त्रवृत्तिस्सकलाऽप्यपास्ता हिरण्यतृष्णैव जनैः प्रशस्ता ।
विक्रीणते तां धनलुब्धचित्ताः यां क्रीणते चापि विशालवित्ताः ॥ १९३ ॥
अतः स्थलं क्षोभकरात्मतन्त्रं दासेरवर्गस्य च कूटयन्त्रम् ।
यतः पराधीननिजेष्टवृत्त्या दुःखेन देहं जहतीह भृत्याः ॥ १९४ ॥
सहिष्णुभावेन विधाय सेवां निजेश्वराणां स्थिरचित्तभावाम् ।
वात्याऽभिहत्यामपि शान्तभूताः स्वदेशकुल्याइव मन्दभूताः ॥ १९५ ॥

अहो बतामी किल 'डच्'पुमांसः कथं प्रवृत्ता अधिजग्मिवांसः ।
विभिन्नवृत्तिं निजपूर्वजेभ्यः 'बेल्जिन्'जनेभ्यः परमानितेभ्यः ॥ १९६ ॥
ये सम्बभूवुः परुषात्मवृत्ताः दीनाअपि स्वार्जिततुष्टचित्ताः ।
युद्धाप्रियाश्चातिशयेन धृष्टाः परं स्वतन्त्रत्वधनेनहृष्टाः ॥ १९७ ॥
अहो! कथं वाऽऽङ्लजना विभिन्नाः न ये परेषां शरणं प्रपन्नाः ।
स्वतन्त्रतां ये परिपालयन्ति सर्वस्वमेतां च विभावयन्ति ॥ १९८ ॥

॥ इति षष्ठो विलासः ॥

निवर्तयामो हृदयं त्वमीभ्यः प्रवर्तयामश्च तदाङ्ग्लदेशम् ।
निर्वर्णयामो जनताप्रवृत्तिं प्रवर्णयामश्च यथावदेनाम् ॥ १९९ ॥
यद्बोधितस्सम्यगिवाऽऽङ्ग्लशब्दश्रुतेन मे चित्तपिको जवेन ।
तमाङ्ग्लदेशं ङयते यदीयाः प्रजा वसन्तर्तुसुखेऽद्वितीयाः ॥ १६० ॥
यत्राभिरम्या विततप्रदेशाः समिन्धते शाद्वलभूप्रदेशाः ।
'आर्केडिया'विश्रुतिगर्वसर्वंकषा हरिद्रत्नरुचा सगर्वम् ॥ १६१ ॥
वहन्ति दीप्राः सरितस्सुरम्यं 'जील'नदीतोऽप्यधिकं च सौम्यम् ।
विहङ्गमानां कलकूजितानि शाखासु शाखासु मनोहराणि ॥ १६२ ॥
दैवी च सृष्टिः कलितात्मपुष्टिः शोभासमष्टिः कृतसर्वहृष्टिः ।

Pride in their port, defiance in their eye,
I see the lords of human kind pass by;
Intent on high designs, a thoughtful band,
By forms unfashion'd, fresh from Nature's hand,
Fierce in their native hardiness of soul,
True to imagin'd rights, above control;
While e'en the peasant boasts these rights to scan,
And learns to venerate himself as man.

Thine, Freedom, thine the blessings pictur'd here,
Thine are those charms that dazzle and endear;
Too blest, indeed, were such without alloy;
But foster'd e'en by freedom ills annoy;
That independece Britons prize too high,
Keeps man from man, and breaks the social tie:
The self-dependent lordlings stand alone,
All claims that bind and sweeten life unknown.
Here, by the bonds of nature feebly held,
Minds combat minds, repelling and repell'd;
Ferments arise, imprison'd factions roar,
Represt ambition struggles round her shore,
Till, over-wrought, the general system feels
Its motions stopped, or frenzy fire the wheels.

तथाऽपि नृणां हृदये न तुष्टिः यतोऽधिकः काम इमां प्रमार्ष्टि ॥ १६३ ॥
गुरुर्विचारो विहितातिचारः चेतस्यमीषां तनुते प्रचारम् ।
सगर्वचित्तानखिले पदार्थे सावज्ञदृष्टिं क्रिरतः परार्थे ॥ १६४ ॥
आङ्ग्लाधिपान् सञ्चरतस्समीपे विलोकयामीव निजप्रतापे ।
महत्सु कार्येषु निबद्धभावाः समीक्ष्यकारित्वमतस्वभावाः ॥ १६४ ॥
सदासमाकारगतस्वरूपाः स्वतन्त्रताभावितमुख्यरूपाः ।
नैसर्गिकासह्यनिजप्रतापाः स्वकल्पितन्यायपराश्च भूपाः ॥ १६५ ॥
अदम्यचेष्टापरितुष्टचित्ताः ये सन्ततोद्योगपरत्ववित्ताः ।
कृषीवलोऽप्यत्र किमत्र चित्रं न्यायानिमानेव खलु स्वतन्त्रम् ॥ १६६ ॥
निरूपयन्नात्मगुणान् स्तवीति मान्यं स्वमाढ्यं च सदा ब्रवीति ।

स्वतन्त्रवृत्ते तइमें तवैव भवन्ति लाभा इह दृश्यमानाः ॥ १६७ ॥
तवैव नान्यस्य हि ताश्च शोभाः या नेत्रयोर्वा मनसश्च रम्याः ।
नूनं प्रियाः स्युर्महिताश्च धन्याः इमे यदि स्युर्नतुदोषदुष्टाः ॥ १६८ ॥
परं भवत्या परिपोष्यमाणाः अरुन्तुदाश्चापि भवन्ति दोषाः ।
आङ्ग्लेयमर्त्यास्तु समाद्रियन्ते तत्तादृशामेव निजेष्टवृत्तिम् ॥ १६९ ॥
या वै नराणां प्रियतापराणां परस्परस्नेहविभञ्जने स्यात् ।
क्षुद्राधिपास्स्वैरगतिप्रवृत्ताः भवन्ति वाऽन्योन्यसहायमुक्ताः ॥ १७० ॥
यतोऽभियोगाः प्रियतोपयोगाः मनोज्ञवृत्तिश्च न तैर्विबुद्धाः ।
अतोऽत्र मैत्र्यां श्लथतां गतायां जनाश्च भिन्नाशयदुष्टभावाः ॥ १७१ ॥
अन्योन्यमेते कलहायमानाः स्वयं जिता वा जयिनस्तथा स्युः ।
क्षोभो यथोदेति ततश्च राष्ट्रे जितास्तु पक्षाः करुणं रुदन्ति ॥ १७१ ॥
यस्यन्ति वा ते पुनरात्मनष्टनदाप्तये ये किल कामदग्धाः ।
यथा च राज्यक्रमयन्त्रमेतदतिप्रसक्तया गतिभङ्गमेति ॥ १७२ ॥
चक्राणि वाऽमुष्य परं भ्रमन्ति स्फुलिङ्गवृष्ट्या विवशानि यन्तुः ।

Nor this the worst. As nature's ties decay,
As duty, love, and honour, fail to sway,
Fictitious bonds, and bonds of wealth and law,
Still gather strength, and force unwilling awe.
Hence all obedience bows to these alone,
And talent sinks, and merit weeps unknown;
Till time may come, when, stript of all her charms,
The land of scholars, and the nurse of arms,
Where noble stems transmit the patriot flame,
Where kings have toil'd, and poets wrote for fame,
One sink of level avarice shall lie,
And scholars, soldiers, kings, unhonoured die.

Yet, think not, thus when freedom's ills I state,
I mean to flatter kings, or court the great.
Ye powers of truth, that bid my soul aspire,
Far from my bosom drive the low desire!
And thou, fair Freedom, taught alike to feel
The rabble's rage, and tyrant's angry steel;
Thou transitory flower, alike undone
By proud contempt or favour's fostering sun,
Still may thy blooms the changeful clime endure!
I only would repress them to secure;
For just experience tells, in ev'ry soil,
That those who think, must govern those that toil;
And all that freedom's highest aims can reach
Is but to lay proportioned loads on each.

नैतत्तथा निन्द्यतमं भवेद्धि यथा भवेदत्र तु वक्ष्यमाणम् ॥ १७५ ॥
स्नेहस्वधर्मादरगौरवेषु च्युताधिपत्येषु निसर्गजेषु ।
कूटप्रयुक्तास्समयार्थबन्धाः वैधाश्च बन्धा ऋणपत्रबन्धाः ॥ १७६ ॥
प्ररूढमूला दमयन्ति दीनान् सेवाविधौ कष्टमनिच्छतोऽपि ।
अतोऽत्र सर्वत्र विधेयभावः सन्दृश्यते वैभवमूलएव ॥ १७७ ॥
मतिप्रभा वाऽपि गुणप्रभावः परं निमग्ना विदयं हतो वा ।
यावत्स कालोऽपि पदं भजेत यस्मिन्नियं भूमिरतिप्रसिद्धा ॥ १७८ ॥
स्थानं बुधानां शरणं भटानां प्रजास्सदा यत्र गभीरभावाः ।
वंशोपवंशानुगतिक्रमेण स्वदेशरागं परिपालयन्ति ॥ १७९ ॥
नृपाः प्रजारक्षणतत्पराश्च नित्यं कवीशा यशसि प्रसक्ताः ।
लोभान्धकूपे विषमे निमज्जेत् समस्तसौभाग्यगुणैर्विमुक्ता ॥ १८० ॥
धीराश्च वीराश्च नराधिपाश्च विमानिता एव यदा म्रियेरन् ।

इत्थं प्रवृत्ते मयि दोषराशेरुद्घाटने सर्वमनस्वितायाः ॥ १८१ ॥
प्रजाप्रभुत्वं नु नृपाधिपत्यं स्तौमीतिबुद्धिस्तु जनाः न कार्या ।
सत्याभिमानिन्ययि देवतेऽम्ब त्वं प्रेरयित्रीह्यसि चेतसो मे ॥ १८२ ॥
यदि प्रपश्येर्हृदये मदीये तादृङ्मतिं तां त्वमपानयेथाः ।
स्वच्छन्दवृत्ते रमणीयवृत्ते त्वया वयं वेत्तुमिहोपदिष्टाः ॥ १८३ ॥
सुदुस्सहं क्षुद्रजनाधिपत्यं दुरुद्धतं भूपतिशासनं वा ।
यथा च पुष्पं क्षणभङ्गुरं स्यात् तिग्मांशुसङ्गात् शिशिराहतेर्वा ॥ १८४ ॥
तथैव शोच्याऽसि समं प्रजाभिः परादृता वा प्रभुधिक्कृता वा ।
भूयाद्विकासस्सततं तथाऽपि तवेह संक्षोभहर्तिं सहन्त्याः ॥ १८५ ॥
परन्तु वाञ्छामि तव प्रवृत्तिं व्यवस्थितां सीम्नि विभूतिहेतोः ।
सर्वत्र लोके परिदृश्यमाने लोकानुभूतिर्भवतीत्थमेव ॥ १८६ ॥
यथा हि बुद्धिप्रवराः प्रशिष्युः निजाः प्रजाः कर्मकलादिजीवाः ।
स्वतन्त्रतायाः परमाशयस्तु मन्येऽहमेवं भवतीति नान्यः ॥ १८७ ॥

Hence, should one order disproportioned grow,
Its double weight must ruin all below.

O then how blind to all that truth requires,
Who think it freedom when a part aspires!
Calm is my soul, nor apt to rise in arms,
Except when fast approaching danger warms;
But, when contending chiefs blockade the throne,
Contracting regal power to stretch their own,
When I behold a factious band agree
To call it freedom when themselves are free;
Each wanton judge new penal statutes draw,
Laws grind the poor, and rich men rule the law;
The wealth of climes, where savage nations roam,
Pillaged from slaves to purchase slaves at home;
Fear, pity, justice, indignation start,
Tear off reserve, and bear my swelling heart;
Till, half a patriot, half a coward grown,
I fly from petty tyrants to the throne.

Yes, brother! curse with me that baleful hour
When first ambition struck at regal power;
And, thus polluting honour in its source,

प्रजा नृपाश्चात्मगुणानुरूपे प्रातिस्विके कर्मणि संलगेयुः ।
अतः प्रसज्जेद्यदि राज्यतन्त्रे व्यत्यासरूपो विधिरीदृशस्य ॥ १८८ ॥
तदा हि राष्ट्रं सनृपं ससर्वं पक्षे भराधिक्यवशाद्विनश्येत् ।

अहो! जनानां परमार्थमौढ्यं यत्ते विजानन्ति विचारशून्यम् ॥ १८९ ॥
स्वातन्त्र्यमुद्भूतमिति प्रहर्षात् पक्षाधिकारे जयतःप्रवृत्ते ।
तावन्ममात्मा भवति प्रशान्तः न योद्धुकामो न च वाऽवसन्नः ॥ १९० ॥
न यावदेनं व्यथयत्यनल्पमत्याहितं किञ्चिदुपानमद्राक् ।
परन्तु पक्षप्रमुखा यदावा परस्परस्पर्धितया प्रवृत्ताः ॥ १९१ ॥
नृपं समास्कन्द्य तदीयशक्तिं विकुण्ठयन्ति स्वबलाभिवृद्ध्यै ।
यदा च पश्याम्युपजापकानां सङ्घस्समुद्घोषयति प्रकामम् ॥ १९२ ॥
स्वमात्रलब्धं निरवग्रहत्वं सार्वत्रिकं सर्वजनप्रियं च ।
न्यायाधिपाः स्वैरगतिप्रवृत्त्या यदा नवं न्यायविधिं लिखन्ति ॥ १९३ ॥
यश्चूर्णपेषं विधनान्पिनष्टि यश्चेश्वराणां भ्रुकुटेर्बिभेति ।
पश्यामि वा लोप्त्रधनान्यमीषां यदा विदेशेषु विलुण्टितानि ॥ १९४ ॥
बलात्स्वदासीकृततज्जनेभ्यो दासानिहस्थांश्च वशे विधातुम् ।
तदा भयन्यायरुषाऽनुकम्पाः शान्तिं मदीयां सहसा विधूय ॥ १९५ ॥
उद्भावमाना विवशं तथा मां प्रोत्साहिका व्याकुलयन्ति भूयः ।
यथा प्रधावामि विसृज्य सर्वान् क्षोभैकशीलानधिनेतृपाशान् ॥ १९६ ॥
नृपाश्रयायैव भयस्वदेशरागोदयाभ्यां सममेव कृष्टः ।
यथा कुरङ्गश्चकितान्तरङ्गः स्वकाश्रयायैव वृकावलोकात् ॥ १९७ ॥

॥ इति सप्तमो विलासः ॥

भ्रातर्मया सह विगर्हय तं तु कालं दुर्दारुणं हृदयदारणमद्यवाऽपि ।
यस्मिन् जनाः प्रथमतस्समदाधिकारलुब्धा बलान्नृपबलं प्रबला व्यलुम्पन्॥१९८॥
किञ्चेत्थमेव निजगौरवमार्जितं प्राक् घ्नन्तस्स्वयं विदयमेव समूलघातम् ।

Gave wealth to sway the mind with double force.
Have we not seen, round Britain's peopled shore,
Her useful sons exchanged for useless ore?
Seen all her triumphs but destruction haste,
Like flaring tapers brightening as they waste?
Seen opulence, her grandeur to maintain,
Lead stern depopulation in her train,
And over fields where scattered hamlets rose,
In barren solitary pomp repose?
Have we not seen, at pleasure's lordly call,
The smiling, long-frequented village fall?
Beheld the duteous son, the sire decayed,
The modest matron, and the blushing maid,
Forced from their homes, a melancholy train,
To traverse climes beyond the western main;
Where wild Oswego spreads her swamps around,
And Niagara stuns with thundering sound?

Even now, perhaps, as there some pilgrim strays
Through tangled forests and through dangerous ways,
Where beasts with man divided empire claim,
And the brown Indian marks with murderous aim;
There, while above the giddy tempest flies,
And all around distressful yells arise,
The pensive exile, bending with his woe,
To stop too fearful, and too faint to go,

वित्ताधिकारमधुसेवनमत्तचित्ताः वित्ताधिराज्यपदमेव दधुस्स्वचित्तम् ॥ १९९ ॥
नाद्राक्ष्म किं जनपदेषु सुखं वसन्तः आङ्ग्लप्रतीरमभितः कृषितो विमोच्य ।
रुद्धा विदेशखनिकर्मणि निष्फले यद्द्रव्यप्रलोभविजितैः प्रभुभिस्तदानीम्॥२००॥
नाद्राक्ष्म वा यदपि सिद्धिरभूदमीषां तोषावहाऽनुपदमेव तु संक्षयाय ।
निस्नेहदीपविशिखेव शमं प्रयान्ती सद्यः सुभास्वरविभोद्गिरणात्समन्तात् ॥२०१॥
नाद्राक्ष्म वा तदपि यद्द्रविणप्रमत्ताः स्वात्मप्रमोदविधये विदयेश्वराश्च ।
ग्रामान् विधाय रहितान् चिरवासिलोकैश्शून्येषु तेषु निजवैभवकेलिमापुः॥२०२॥
नाद्राक्ष्म किं तदपि यत्प्रभुतोषणाय ग्रामश्च सुन्दरतरो मरुतामवाप ।
यत्र प्रजाः कृषिपराअपि नित्यतुष्टाः चिन्तानभिज्ञमनसश्च चिरं न्यवात्सुः ॥२०३॥
नाद्राक्ष्म वा यदपि भूरिकुटुम्बकेषु निष्कासितेषु सहसा निजमन्दिरेभ्यः ।
वश्यस्सुतस्सुजरठो जनकस्सुशीला भार्या त्रपाभरविनम्रमुखी च कन्या ॥२०४॥
देशेषु पश्चिमसमुद्रमतीत्य कृच्छ्रात् हा हन्त हन्त करुणं व्यचरन्गृहेभ्यः ।
दृष्टिं सबाष्पचकितां परितः किरन्तश्शून्यासु दिक्षु च विदिक्षु शरण्यशून्याः२०५॥
यत्रा' स्वगो 'वनधुनीमभितस्सुघोरां संशेरतेऽतिविषमाः पृथुकच्छदेशाः ।
यत्र श्रुती बधिरयत्यपि घोरघोषपोषेण भीषण' नयागर 'सिन्धुपातः ॥ २०६ ॥

अद्याप्यभाग्यहतको यदि तत्र कश्चित्पान्थः प्रमाद्यति कदाचन नैजमार्गात्।
कान्तारवर्त्मसु लतापिहितोदरेषु नानाविधक्षतिकराश्रयभीषणेषु ॥ २०७ ॥
हिंस्राश्च यत्र हि मृगा वनराज्यलक्ष्मीं संभुञ्जते समतयेव किरातपाशैः ।
यत्रागतं कलयते निजबाणलक्ष्यं पान्थं जिघांसुरपि पिङ्गलभिल्लवर्गः ॥ २०८ ॥
यत्रोद्भवन्ति सहसा सह सालपर्णैः चण्डस्वनास्सरभसं समुदग्रवात्याः ।
तोदावहाश्च विविधा विधिपीडितानामार्तस्वरास्समुदयन्त्यभितोऽपि यत्र ॥२०९॥
प्रव्राजितस्सतु यदा समटाच्यमानः चिन्ताविमूढमनसा विगतिर्विदेशे ।
भुग्नाननश्च पथि दुःखभरेण भीत्या स्थातुं न वाञ्छति न तान्तिवशाच्च यातुम्।२१०।

Casts a long look where England's glories shine,
And bids his bosom sympathize with mine.

Vain, very vain my weary search to find
That bliss which only centres in the mind.
Why have I strayed from pleasure and repose,
To seek a good each government bestows?
In every government, though terrors reign,
Though tyrant kings or tyrant laws restrain,
How small, of all that human hearts endure,
That part which laws or kings can cause or cure!
Still to ourselves in every place consigned,
Our own felicity we make or find.
With secret course, which no loud storms annoy,
Glides the smooth current of domestic joy;
The lifted axe, the agonizing wheel,
Luke's iron crown, and Damiens' bed of steel,
To men remote from power but rarely known,
Leave reason, faith, and conscience, all our own.

FINIS.

सोत्कण्ठमाकलयते बत दीर्घदीर्घा दृष्टिं विलासभवने निजदेशएव ।
धत्ते स्वकीयहृदयं च समानमेव मच्चेतसा यदहमद्य करोमि नूनम् ॥ २११ ॥

मुधा प्रयासो हि वृथाऽभिलाषः श्रान्तोऽस्मि मूढोऽस्मि च लज्जितोऽस्मि ।
यतो नपश्यन् हृदये प्रशान्तिं बहिःस्थले तां व्यचरं विचेतुम् ॥ २१२ ॥
कुतश्च्युतीभूय शमात्ममोदादभीप्सितार्थानुपलब्धुकामः ।
एकैकराज्येऽप्यचरं वृथाऽहं यथा पिपासुर्मृगतृष्णिकायाम् ॥ २१३ ॥
भयेषु सत्सु प्रतिराज्यमुग्रंपश्येषु किंराजसु वा भवत्सु ।
तीव्रेषु वा न्यायनिबन्धनेषु तथाऽप्यलं राजति चित्तशान्तिः ॥ २१४ ॥
यतो नराणामनुभूतिवर्गे भवेत् कियानेव हि तादृशोंऽशः ।
न्यायाश्च वा भूपतयश्च वा यं नोत्पादयेयुर्न च वारयेयुः ॥ २१५ ॥
अतो हि सर्वत्र सुखानि सन्ति यदि प्रगल्भा वयमेतदाप्तौ ।
यथा गभीरा तटिनी प्रसन्ना न क्षोभिता वातहताऽपि याति ॥ २१६ ॥
तथैव संसारसुखप्रवाहो विवेकिनां न्यक्कृतबाह्यबाधः ।
खड्गा वधे राजभटप्रयोज्याः चक्राणि वा तीव्ररुजावहानि ॥ २१७ ॥
तप्तायसं 'ल्यूक्'मकुटं सुभारं शूलाधिरोपश्च कृतागसां वा ।
'डामिन्'महाद्रोहिणि च प्रयुक्तः सुतीक्ष्णकालायसपट्टदण्डः ॥ २१८ ॥
इमे हि दण्डा विदिता न तेषां मतिस्तु तृष्णां भजते न येषाम् ।
ये धर्ममार्गं हरिभक्तियोगं मनःप्रशान्तिं च जनाश्श्रयन्ते ॥ २१९ ॥

॥ इति अष्टमो विलासः ॥

॥ इति मङ्गलम् ॥

गोल्ड्स्मिन्नाममहाकविर्जनिमवापैर्लैड्प्रदेशे पुरा
तस्येयं कृतिरुत्तरा विजयते या यात्रिकाभिख्यया।
सेयं सम्परिवर्तिता ललितया गैर्वाणवाण्या मया
जीयात्तोषकरी समस्तविदुषामापूर्वमापश्चिमम् ॥ १ ॥

सेयं मया ऽव्यरचि संस्कृतपण्डितानां पाश्चात्यदेशकविताऽऽशयदर्शनाय ।
शृङ्गारभावविरहादिहबालकानां गीर्वाणवाग्रतिजुषां च कृतेऽङ्गनानाम् ॥

वेदवेदान्तवेद्याय मेघश्यामलमूर्तये ।
पुंसां मोहनरूपाय पुण्यश्लोकाय मङ्गळम् ॥

॥ श्रीकृष्णार्पणमस्तु ॥



मदम्बाप्रतिकृतिः

The 'My Mother's Picture.'

ON THE RECEIPT

OF

MY MOTHER'S PICTURE

BY

COWPER.

Oh that those lips had language! Life has passed
With me but roughly since I heard thee last.
Those lips are thine—thy own sweet smile I see,
The same that oft in childhood solaced me;
Voice only fails, else how distinct they say,
"Grieve not, my child, chase all thy fears away!"
The meek intelligence of those dear eyes
(Blest be the art that can immortalize,
The art that baffles Time's tyrannic claim
To quench it!) here shines on me still the same.

Faithful remembrancer of one so dear,
O welcome guest, though unexpected here!

॥ श्रीः ॥

श्रीहयवदनपरब्रह्मणे नमः

आगर्भात्क्षमया तुल्यं क्षमेव तनुमाश्रिता ।
मातेव रक्षति सुतान् तस्मान्भात्रे नमोनमः ॥

अथ 'कौपर्'नाममहाकवेः 'मदम्बाप्रतिकृतिः'

(करगतायां स्वमातृप्रतिकृतौ)

अपिनाम भवेदिहौष्ठभागे रमणीये रमणीयवाग्विलासः ।
असुधारणमम्ब निर्वहामि तव विश्लेषदिनात्कथंकथंचित् ॥ १ ॥
तदिदं नु तवौष्ठबिम्बयुग्मं तदिदं चापि ननु स्मितं मनोज्ञम् ।
शिशुभावगतं प्रसन्नवृत्त्या मुहुराश्वासयतां मदम्ब ये माम् ॥ २ ॥
रमणीयवचःप्रवृत्तिरेव परिणश्यत्यधुना तवौष्ठभागे ।
तदिदं यदि नाभविष्यदम्ब कथमेवं स्फुटमेषचावदिष्यत् ॥ ३ ॥
" प्रियवत्स जहीहि शोकमेनं तव भीतिस्सकलाऽप्यपैतु दूरम् ।
इयमस्मि समीपमागता ते चिरकालाद्विधुरस्य सान्त्वनाय " ॥ ४ ॥
प्रियमुग्धविदग्धसौम्यदृष्टेर्मयि पातः प्रणयास्पदे तवाम्ब ।
अधुनाऽपि सुधारसाभिषेकं विदधात्येव पुरेव तुल्यरूपः ॥ ५ ॥
(जयतात्तदिदं चिराय शिल्पं यदिह स्थापयतीव सर्वभावान् ।
अवधीर्य समस्तवस्तुजालक्षिलकालस्य पराक्रमप्रभावम् ॥ ६ ॥
कथमेतदलं विभाति चित्रं यदिहाम्बाऽसुयुतेव दृश्यमाना ।
विधिना मुषिताऽपि सानुकम्पं पुनरादाय समर्पितेव मह्यम् ॥ ७ ॥
विधिसृष्टिमतीत्य राजतेऽहो ! सुभगं रूपमिदं सुशिल्पिसृष्टम् ।
विधिसृष्टिगतं तु कालमुष्टं तदिदं स्थास्नु न गोचरे हि तस्य) ॥ ८ ॥

मम मातुरतीव वल्लभायाः परमार्थेन विबोधयित्रि भद्रे ।
असि भोः प्रतिमे प्रियातिथिर्मे सहसैवाऽऽपतिताऽपि मत्समीपे ॥ ९ ॥

Who bidst me honour with an artless song,
Affectionate, a mother lost so long,
I will obey, not willingly alone,
But gladly, as the precept were her own:
And, while that face renews my filial grief,
Fancy shall weave a charm for my relief,
Shall steep me in Elysian reverie,
A momentary dream that thou art she.

My mother! when I learnt that thou wast dead,
Say, wast thou conscious of the tears I shed?
Hover'd thy spirit o'er thy sorrowing son,
Wretch even then, life's journey just begun?
Perhaps thou gav'st me, though unfelt, a kiss:
Perhaps a tear, if souls can weep in bliss—
Ah, that maternal smile! It answers—Yes.
I heard the bell toll'd on thy burial day,
I saw the hearse that bore thee slow away,
And, turning from my nurs'ry window, drew
A long, long sigh, and wept a last adieu!
But was it such?—It was—Where thou art gone
Adieus and farewells are a sound unknown.
May I but meet thee on that peaceful shore,
The parting word shall pass my lips no more!
Thy maidens, grived themselves at my concern,
Oft gave me promise of thy quick return.
What ardently I wish'd I long believed,

अनुशास्यधुनेव बोधयन्ती प्रतिमे मां सरलस्तवैस्सुगीतैः ।
चिरकालमृतामतीवहृद्यां बत सम्भावयितुं चिराय मेऽम्बाम् ॥ १० ॥
तदहं भवतीं प्रशस्यरूपामनुरुद्धयेऽद्य हृदा मुदा च भूयः ।
अनुशिष्टइवाम्बयैव साक्षात् स्वगुणानां स्तवने प्रसन्नवृत्त्या ॥ ११ ॥
अधुना तव दर्शनेन भूयो नवतामाप्नुवतीह मातृशोके ।
त्वयि भावनया ह्यनन्यवृत्त्या समुपस्थापितयाऽम्बयेव साक्षात् ॥ १२ ॥
क्षणमात्रमपास्य शोकवेगं बत सोऽहं प्रमदाम्बुधौ निमज्ज्ये ।

मम मातरहो! यदा व्यजानां भवती कालवशं गतेति वार्ताम् ॥ १३ ॥
वद किन्नु तदा प्रमुक्तकण्ठं रुदितं मे नयनाम्बु च व्यबुद्धाः ।
अजिहासुरभूद्यदि भ्रमन्मां प्ररुदन्तं परितस्तवाम्ब जीवः ॥ १४ ॥
अतिशैशवएव मन्दभाग्यः कथमासं जननि त्वया विमुक्तः ।
बहुशस्त्वमदा मृता तदानीमनभिज्ञे मयि चुम्बनं महार्घम् ॥ १५ ॥
बहुशः करुणं तदा व्यरोदीः यदि रुग्णुर्दिविवासिनोऽपि जीवाः ।
अहह! स्मितमेतदम्ब नूनं प्रतिवक्ति 'प्रियवत्स तत्तथेति' ॥ १६ ॥
तनुसंस्करणाय ते मृतायाः ध्वनितां चाशृणवं परेतघण्टाम् ।
चरमं तव यानमप्यपश्यं शनकैर्हन्त विदूरमुह्यमानम् ॥ १७ ॥
अथ निश्श्वासितं च दीर्घदीर्घं परिभुञ्जन्सममेव बाष्पपूरैः ।
मम गर्भगृहीयजालमार्गाच्चरमापृच्छनपूर्वकं न्यवर्ते ॥ १८ ॥
चरमं नु तदाऽम्ब यन्ममोक्तं त्वयि सौवस्तिकमेतदेव नान्यत् ।
न हि सन्ति वियोगजानि तत्र चरमामन्त्रणकानि यत्र याता ॥ १९ ॥
अपिनाम लभेय योगमम्ब प्रशमानन्दपदे पदे भवत्या ।
अपिनाम पुनश्च तत्र न स्याच्चरमं स्वस्तिवचो मम प्रयोज्यम् ॥ २० ॥
अतिदुःखितमम्ब मां वियोगात्तव दासीजनताऽपि सानुतापा ।
त्वरितागमने पुनर्भवत्याः शपथैस्सान्त्वयति स्म भूरिकृत्वः ॥ २१ ॥

And, disappointed still, was still deceived.
By expectation every day beguiled,
Dupe of *to-morrow* even from a child.
Thus many a sad to-morrow came and went,
Till, all my stock of infant sorrow spent,
I learnt at last submission to my lot;
But, though I less deplored thee, ne'er forgot.

Where once we dwelt our name is heard no more,
Children not thine have trod my nursery floor;
And where the gard'ner Robin, day by day,
Drew me to school along the public way,
Delighted with my bauble coach, and wrapt
In scarlet mantle warm, and velvet capt,
'Tis now become a history little known,
That once we call'd the pastoral house our own.
Short-liv'd possession! but the record fair
That memory keeps, of all thy kindness there,
Still outlives many a storm that has effac'd
A thousand other themes less deeply trace'd.

Thy nightly visits to my chamber made,
That thou mightst know me safe and warmly laid;
Thy morning bounties ere I left my home,
The biscuit, or confectionary plum;
The fragrant waters on my cheek bestowed

यदिदं चिरमुत्सुकोऽम्ब वाञ्छन्नभवं प्रत्ययितस्तदत्र जातः ।
विफलायिततादृशाभिलाषश्चपलात्मा परिवञ्चितस्सदेत्थम् ॥ २२ ॥
पुनरैष्यसि योक्ष्यसे ध्रुवं श्वः प्रियवत्सेन मया नचेद्दिनेऽस्मिन्।
इति बद्धमनोरथोऽम्ब बाल्याद्दिवसानेव बतानयं हताशः ॥ २३ ॥
मम शोकविवृद्धिमात्रमेवं बहुदुःखोदिवसानि च व्यतीयुः ।
चिरकालमलं विलप्य दीनं शिशुभावोचितमूढभावयुक्तः ॥ २४ ॥
मम दैवविपाक ईदृगेवेत्युपशान्तोऽभवमम्ब सोऽहमन्ते ।
यदिचासमहं प्रमन्दशोको न कदाऽप्यम्ब मया तु विस्मृतैव ॥ २५ ॥

॥ इति मातरि स्वभक्त्याविष्कारे प्रथमःप्रकारः ॥

अवसाम वयं पुराऽम्ब यत्र न परं श्रूयतएव नः प्रवृत्तिः ।
मम गर्भगृहीयकुट्टिमेषु परकीयाश्शिशवो न ते रमन्ते ॥ २६ ॥
अनुवारमहं च यत्र 'राबिन्' वनपालेन कुमारपाठशालाम् ।
उपवेश्य मदीयबालयाने सुभगक्रीडनकेन मोदमानः ॥ २७ ॥
सुदुकूलविवेष्टितोत्तमाङ्गः स्वरुणोष्णावरणावगुण्ठिताङ्गः ।
अनुरथ्यमनीय एष वासः पितुरम्बाद्य गतस्स्मृतेर्विदूरम् ॥ २८ ॥
कियदल्पदिनोपभोग्यमासीत् पितृपैतामहमन्दिरं वरं नः ।
स्मृतिरम्ब तथापि गाढरूढा हृदये मे तव वत्सलक्रियाणाम् ॥ २९ ॥
प्रचकास्ति कदाऽप्यलङ्घनीया विविधैरन्यविलोपकैः प्रबाधैः ।

निशि तल्पगतं तु वत्सले मां प्रियवत्सं तव सादरं यदायाः ॥ ३०॥
अवलोकितुमस्मि वा नवेति सुखसुप्तस्समुपावृताङ्गयष्टिः ।
अददाश्च यदादराद्विभाते गृहतो निर्गमनात्पुरैव मह्यम् ॥ ३१ ॥
झडिति प्रविहाय कार्यमन्यन्मधुरापूपफलादिभक्ष्यजातम् ।
भवती स्वयमन्वहं मुखं मे पयसाऽऽमोदवता विशोधयन्ती ॥ ३२ ॥

By thy own hand, till fresh they shone and glowed ;
All this, and more endearing still than all,
Thy constant flow of love, that knew no fall,
Ne'er roughened by those cataracts and brakes
That humour interposed too often makes ;
All this still legible in mem'ry's page,
And still to be so to my latest age,
Adds joy to duty, makes me glad to pay
Such honours to thee as my numbers may ;
Perhaps a frail memorial, but sincere,
Not scorned in heaven, though little noticed here.

Could Time, his flight reversed, restore the hours,
When, playing with thy vesture's tissued flowers,
The violet, the pink, and Jessamine,
I pricked them into paper with a pin
(And thou wast happier than myself the while,
Wouldst softly speak, and stroke my head and smile),
Could those few pleasant days again appear,
Might one wish bring them, would I wish them here ?
I would not trust my heart—the dear delight
Seems so to be desired, perhaps I might.—
But no—what here we call our life is such
So little to be loved, and thou so much,
That I should ill requite thee to constrain
Thy unbound spirit into bonds again.

अरुणौ तरुणौ च यत्कपोलावकरोत्कोमलपल्लवप्रकाशौ ।
अतिकोमलवृत्तिरम्ब या ते मयि वात्सल्यझरी च सम्प्रवृत्ता ॥ ३३ ॥
परमं दयिता कदाऽप्यनूना परमाह्लादकरी सुधाझरीव ।
अविकारितनैजवृत्तयोगा गृहकृत्येष्वभिपातुकैर्विकारैः ॥ ३४ ॥
स्मृतिराज्यविभुत्वतस्त्विमानि मम जीवावधिकां स्थितिं भजन्ते ।
इयमेव चिरस्मृतिर्भवत्याः रुचिराणां परमादरक्रियाणाम् ॥ ३५ ॥
अनुशास्ति कृतज्ञमद्य वत्सं तव सेवासुविधौ स्तवोपहारैः ।
इयमम्ब मदीयदीनसेवा सहजप्रेमभरेण याऽऽर्प्यतेऽद्य ॥ ३६ ॥
न भवेद्यदि मानिता धरायां विभवेदेव हरेः प्रसादयोग्या ।

अपिनाम पुनस्समापतेयुः चलितास्ते विनिवृत्त्यकालभागाः ॥ ३७ ॥
विहरन्नवगुण्ठने यदा ते खचितैरम्ब मनोहरैः प्रसूनैः ।
नवपाटलमालतीविडम्बानलिखं पत्रतलेषु सूचिकोट्या ॥ ३८ ॥
भवती तु तदाऽभवद्धि मत्तोऽप्यधिकानन्दभरा मदीयकृत्यैः ।
परिपेशलया गिरा हसन्ती मधुरं वीक्ष्य मदीयबालचेष्टाः ॥ ३९ ॥
मम शीर्षतलं परामृशस्त्वं ननु सुस्निग्धकरेण वत्सलेऽम्ब ।
यदि ते दिवसाः प्रमोदरूपाः प्रमितास्सम्प्रति मे पुनर्भवेयुः ॥ ४० ॥
यदिचैकमनोरथश्चिराय मम सिद्ध्येदधुना परं प्रियं स्यात् ।
मम चित्तमथापि नानुरुध्ये यदिदं त्वामभिकाङ्क्षतीह भूयः ॥ ४१ ॥
तवमातुरतीववल्लभायाः पुनरत्रागमनं न साम्प्रतं हि ।
यदिहाम्ब जानिं प्रपद्य जीवा दयिता वा महिताश्च वा न सन्ति ॥ ४२ ॥
भवती तु विसृष्टमर्त्यभावा वहुमान्या खलु मे तथा प्रिया च ।
पतगीमिव पञ्जराद्विमुक्तां विहरन्तीं वियति स्वकामवृत्त्या ॥ ४३ ॥
त्रिदिवेऽपि निरङ्कुशप्रचारां भवतीमत्र शरीरिबन्धरूपे ।
पुनरेव यदि प्रकामयेऽहं स यथास्यामपकारएव लग्नः ॥ ४४ ॥

॥ इति मातरि स्वभक्त्याविष्कारे द्वितीयःप्रकारः॥

Thou, as a gallant bark from Albion's coast
(The storms all weathered and the ocean crossed)
Shoots into port at some well-havened isle,
Where spices breathe, and brighter seasons smile,
There sits quiescent on the floods that show
Her beauteous form reflected clear below,
While airs impregnated with incense play
Around her, fanning light her steamers gay;
So thou, with sails how swift! Hast reached the shore,
"Where tempests never beat nor billows roar,"
And thy loved consort on the dang'rous tide
Of life long since has anchored by thy side.

But me, scarce hoping to attain that rest,
Always from port withheld, always distressed—
Me howling blasts drive devious, tempest tost,
Sails ript, seams op'ning wide, and compass lost,
And day by day some current's thwarting force
Sets me more distant from a prosp'rous course.
But, oh the thought that thou art safe and he!
That thought is joy, arrive what may to me.
My boast is not, that I deduce my birth
From loins enthroned and rulers of the earth;
But higher far my proud pretensions rise—
The son of parents passed into the skies!

महिता तरणिर्यथाऽऽङ्ग्लतीराच्चलिता वातहतीर्विजित्य मार्गे ।
समतीत्य च वारिधिं विशालं शुभनौकाश्रयमन्तरीपमेकम् ॥ ४५ ॥
परिवाति सुगन्धिरम्यवातः ऋतुधर्माश्च परं हसन्ति यत्र ।
प्रविशेत्सुसुखं लसेच्च तत्र स्तिमितात्मा प्रतिबिम्बिता च रम्यम् ॥ ४६ ॥
परिशान्ततरङ्गतुङ्गपीठे निजधात्रया हृदयेऽर्पितेव तोषात् ।
विलसेन्नृपतिर्यथा स्वपीठे विजितारातितया प्रशान्तचित्तः ॥ ४७ ॥
पवने च सुगन्धिगर्भभारादिव मन्दं चलिते समागतां याम् ।
अतिदूरतलागमप्रयासादिव विस्रस्तशरीरसन्धिबन्धाम् ॥ ४८ ॥
परिवीजयतीव मूर्धभागे मधुरं नर्तितकेतुतालवृन्तैः ।
भवती च कियद्द्रुतं तथैवापरिपक्के वयसि प्रकृष्टपुण्यैः ॥ ४९ ॥
अतिलङ्घ्य भवाम्बुधिं विशालं विविधापत्तितरङ्गमृत्युवातम् ।
त्रिदिवेऽम्ब विराजते हि यत्र न कदाचिद्भयशोकमृत्युयोगाः ॥ ५० ॥
अथ तत्रभवान् तवासुनाथोऽप्यनुभयात्र विभिन्नसङ्कटौघान् ।
तव पार्श्वमुपेत्य शोभमानश्चिरकालाद्व्रजते निरन्तशान्तिम् ॥ ५१ ॥

अहमम्ब पुनस्सदा विदूये सुतरां तादृशसौख्यलाभदूरः ।
तरणिर्हि यथा समुद्रमध्ये विहतेतस्ततएव चण्डवातैः ॥ ५२ ॥
प्रविदारितकेतुपट्टिकाऽश्माहतिविस्तारितसन्धिबन्धरन्ध्रा ।
अपयातदिशाप्रदर्शियन्त्रा प्रविणश्येद्विवशा च नाविकानाम् ॥ ५३ ॥
अहमस्मि तथैव शान्तिहीनो विविधक्लेशपरम्पराऽभिभूतः ।
अनुवासरमम्ब काचिदाशाविहतिस्सम्पातिता झरीव शृङ्गात् ॥ ५४ ॥
दवयत्यधिकं शुभायतेर्मां निखिलोत्साहविभञ्जनेन साकम् ।
वत मेऽस्ति तथाऽपि चित्तशान्तिः परितोषश्च महानसंशयं मे ॥ ५५ ॥
वससीति सुखं मदीयपित्रा दिवि यद्धात्रि तदस्तु मे प्रकामम् ।
मणिराजिविराजदुच्चसिंहासनराजद्वरराजवंशजातः ॥ ५६ ॥
मम चेदिह भावितोऽभिमानो न कदाप्येष मया विभाव्यतेऽम्ब ।

And now, farewell—Time unrevoked has run
His wonted course, yet what I wished is done.
By contemplation's help not sought in vain,
I seem to have lived my childhood o'er again;
To have renewed the joys that once were mine,
Without the sin of violating thine:
And, while the wings of Fancy still are free,
And, I can view this mimic show of thee,
Time has but half succeeded in his theft—
Thyself removed, thy power to soothe me left.

FINIS.

ापितु त्रिदिवे प्रगल्भतादृग्व्यपदेशादतिरिच्यमानभूम्नि ॥ ५७ ॥
ाजरामृतिभीतिशोकयोगे लसतोर्वां तनयोऽस्मि हन्त ! पित्रोः ।
ायमेव महत्तरोऽभिमानः प्रभुतामेति सदा मदात्मराज्ये ॥ ५८ ॥
अधुनाऽम्ब मया विसर्जिताऽसि तव मार्गे भवताच्छिवं निकामम् ।
समयस्तु यदा त्वयाऽभ्यनन्दं पुनरावृत्तिविहीनमेव यातः ॥ ५९ ॥
परिपक्वविभावनामहिम्ना समुपस्थापितया त्वया ममाग्रे ।
गतशैशवकालभोगयोगं पुनरद्यानुभवन्निवास्मि मातः ॥ ६० ॥
तव दिव्यसुखोपभोगभङ्गोत्थितदोषेण विनैव भावनाऽऽप्ताम् ।
भवतीं पुनरत्र लोकमानः परमानन्दयुतः पुरेव जातः ॥ ६१ ॥
अपिचात्मनि भावनाऽम्ब यावद्विवरीवर्ति निरङ्कुशप्रचारा ।
पुरतः प्रतिमामिमां लसन्तीं तव यावच्च कुतूहलाद्विलोके ॥ ६२ ॥
भवतीं हृतवान् विधिस्तु मन्ये बत सिद्धार्थमनोरथो हि जातः :
यदहं पुनरेव पूर्वतुल्यं परिवेवे तव लालनाप्रभावम् (प्रमोदम्) ॥ ६३ ॥

॥ इति मातरि स्वभक्त्याविष्कारे तृतीयःप्रकारः ॥

'कौपर्'नाममहाकविर्जनिमवापाङ्गप्रदेशे पुरा
तस्येयं कृतिरुत्तरा विजयते या'मन्मातृचित्रा'ख्यया ।
सेयं सम्परिवर्तिता ललितया गैर्वाणवाण्या मया
जीयात्तोषकरी समस्तसुधियामापूर्वमापश्चिमम् ॥ १ ॥

अपिच—'कौपर्' कृतां कृतिमिमां निजमातृभक्ति
पारम्यदर्शनपरामभिरामवृत्ताम् ।
येऽधीयते सकृदपि स्थिरभावयुक्ताः
तेचापि यान्ति परमां निजमातृभक्तिम् ॥

॥ इति मङ्गलम् ॥

क्रैस्ताब्देषु गतेषु षट्परशतोपेतात्रिरावृत्तषट्- ।
संख्यागण्यशतैर्मितेषु महिता काव्यद्वयीयं मया ।
श्रीमद्वेङ्कटरङ्गवर्यकविना गीर्वाणभाषाऽऽत्मतां ।
नीता च प्रकटीकृता विजयतां जेगीयमाना बुधैः॥ ॥ १ ॥

(अपिच)

यः कर्णाटभुवं प्रशास्ति सुधिया संश्रित्य यं राजते ।
लक्ष्मीर्येन सुपोष्यते बुधगणो यस्मै स्पृहा नः परा ।
यस्मादार्यमतं चकास्ति विभुता यस्यानवद्या प्रजाः ।
यस्मिन्नित्यसमुत्सुकास्स जयतु श्रीकृस्णराजो नृपः॥ ॥ २ ॥

(किञ्च)

राजानः परिपालयन्तु वसुधां धर्मे प्रसक्तास्सदा ।
सेयं भारतमेदिनी विलसताद्राजन्वती राजभिः ।
देवे राजसु च प्रभक्तिभरिता नन्दन्तु नित्यं प्रजाः ।
श्रीवाण्याविह राजतामतितरां देवोऽपि विभ्राजताम्॥ ॥ ३ ॥

इति मङ्गलम्.

॥ श्रीकृष्णार्पणमस्तु ॥